asmin vidyālaye sthitānāṁ sakala janānāṁ adhyāpakānāṁ, vidyārthināṁ, asmākaṁ sasuhradāṁ, sakuṭumbānām asmin loke sthitānāṁ sakala bhūtānāṁ kṣema sthairya vijaya āyur ārogya aiśvarya sahayoga saṅgathana abhivṛdhyerthaṁ samasta roga parihāra dvārā, manaś-śānti prāptyarthaṁ, śarīra-dhṛḍa-gātratā siddhyarthaṁ, dharma artha kāma mokṣa catur vidha phala puruṣa artha siddhyarthaṁ śrīmad dhanvantarim uddiṣya śrī dhanvantari prītyarthaṁ purāṇokta prakāreṇa śrī dhanvantari pūjāṁ [vṛata homādikaṁ] ahaṁ kariṣye ॥

In this school, for the well-being, stability, victory, longevity, health, prosperity, and support of all the teachers, students, our well-wishers, and all families residing in this communitty, and for the overall enhancement through the elimination of all diseases, attainment of mental peace, strength and firmness of the body, and for the accomplishment of the four goals of life – righteousness, wealth, pleasure, and liberation – I shall perform the worship [including rituals like Vrata and Homa] of Lord Dhanvantari in the manner described in the Puranas, with the aim of pleasing Lord Dhanvantari.

Personal

पूर्व उक्त गुण विशेषण विसिष्टायाम् अस्यां शुभ तिथौ _____ नक्षत्रे जातायाः (F) जातस्य (M) _____ नामधेय अप-मृत्यु दोष परिहारार्थं सर्व अरिष्ठ शान्त्यर्थं सर्व अभिष्ठ सिद्ध्यर्थं सर्व रोग परिहार द्वार श्री धन्वन्तरि प्रसाद सिद्ध्यर्थं श्री धन्वन्तरि पूजां करिष्ये ॥

pūrva ukta guṇa viśeṣaṇa visiṣṭāyām asyāṁ śubha tithau _____ nakṣatre jātāyāḥ (f) jātasya (m) _____ nāmadheya apa-mṛtyu doṣa parihārārthaṁ sarva ariṣṭha śāntyarthaṁ sarva abhiṣṭha siddhyarthaṁ sarva roga parihāra dvāra śrī dhanvantari prasāda siddhyarthaṁ śrī dhanvantari pūjāṁ kariṣye ॥

In the auspicious moment of the aforementioned special qualities, for _____born under the constellation _____ (fill in the specific Nakshatra) this ceremony is performed for the alleviation of untimely death doshas, for the pacification of all negativity, for the accomplishment of all desired objectives, and for the remedy of all diseases. To seek the blessings of Lord Dhanvantari, I shall perform the worship of Lord Dhanvantari for the attainment of his grace.

Dhyāna śloka

शङ्खं चक्रं जलौकं दधद् अमृत घटं चारु दोर्भिस् छतुर्भिः ।
सूक्ष्म स्वछ्हन् हृदयंशुक परिविलसन् मौलिं अम्भोज नेत्रं ॥
कालं भोदोज्-ज्वलाङ्गं कटि तट विलसच् चारु पिताम्बराड्यम् ।
वन्दे धन्वन्तरिं तं निखिल गद वन प्रौड दावाग्नि नीलाम् ॥

śaṅkhaṁ cakraṁ jalaukaṁ dadhad amṛta ghaṭaṁ cāru dorbhis chaturbhiḥ ।
sūkṣma svachhan hṛdayaṁśuka parivilasan mauliṁ ambhoja netraṁ ॥
kālaṁ bhodoj-jvalāṅgaṁ kaṭi taṭa vilasac cāru pitāmbarāḍyam ।
vande dhanvantariṁ taṁ nikhila gada vana prauḍa dāvāgni nīlām

Salutations to Dhanvantari, who holds with his four arms a conch (success), a wheel or disk of energy (freedom), a leech (purity) and a pot celestial ambrosia (happy, long and fulfilled life), in whose heart shines a very subtle, clear, gentle and pleasing blaze of light, this light also shines all around his head and lotus eyes, who by his mere play destroys all diseases like a mighty forest fire.

dhyānam

चतुर्भुजं पीत वस्त्रं सर्वालङ्कार शोभितम् । ध्यायेद् धन्वन्तरिं देवं सुरा-सुर नमस्कृतम् ॥

catur bhujaṁ pīta vastraṁ sarvālaṅkāra śobhitam ।
dhyāyed dhanvantariṁ devaṁ surā-sura namas-kṛtam ॥

I meditate on Lord Dhanvantari, the four-armed deity dressed in yellow garments, adorned with all ornaments, and revered by both gods and demons.

ॐ धं धन्वन्तरये नमः - ध्यायामि

oṁ dhaṁ dhanvantaraye namaḥ - dhyāyāmi

āvāhanam

सर्व लोक परित्राण दीक्षा-दीक्षितं अव्ययम् । आवाहयामि लोकेशं पीयूषाञ्चित हस्तकम् ॥

sarva loka paritrāṇa dīkṣā-dīkṣitaṁ avyayam ।
āvāhayāmi lokeśaṁ pīyūṣāñcita hastakam ॥

I invoke the Lord of the world, the imperishable one, consecrated for the protection of all realms, holding nectar in his hand.

ॐ धं धन्वन्तरये नमः - आवाहयामि

oṁ dhaṁ dhanvantaraye namaḥ - āvāhayāmi

āsana

विविध रत्न खचितं कार्त स्वर विनिर्मितम् । गृहाणेदं महा स्वामिन् आसनं मृदुलं शुभम् ॥

vividha ratna khacitaṁ kārta svara vinirmitam ।
gṛhāṇedaṁ mahā svāmin āsanaṁ mṛḍulaṁ śubham ॥

O great master, please accept this soft and auspicious seat, studded with various gems and made of gold.

ॐ धं धन्वन्तरये नमः - आसनं समर्पयामि

oṁ dhaṁ dhanvantaraye namaḥ - āsanaṁ samarpayāmi

pādyam

गङ्गादि सर्व तीर्थेभ्यो मयानीतं शुभोदकम् । तोयं एतत् सुख स्पर्शं पाद्यार्थं प्रतिगृह्यताम् ॥

gaṅgādi sarva tīrthebhyo mayānītaṁ śubhodakam ।
toyaṁ etat sukha sparśaṁ pādyārthaṁ pratigṛhyatām ॥

Please accept this water for washing your feet, brought by me from all holy rivers like the Ganges, which is pleasant to touch.

ॐ धं धन्वन्तरये नमः - पाद्यं समर्पयामि

oṁ dhaṁ dhanvantaraye namaḥ - pādyaṁ samarpayāmi

arghyam

अर्घ्यं च फल संयुक्तं गन्ध पुष्पाक्षतैर् युतम् । अनाथ नाथ सर्वज्ञ गृहाण करूणा निधे ॥

arghyaṁ ca phala saṁyuktaṁ gandha puṣpākṣatair yutam ।
anātha nātha sarvajña gṛahāṇa karūṇā nidhe ॥

O Lord of the helpless, omniscient one, repository of compassion, please accept this offering (arghya) mixed with fruits, fragrances, flowers, and rice grains.

ॐ धं धन्वन्तरये नमः - अर्घ्यं समर्पयामि

oṁ dhaṁ dhanvantaraye namaḥ - arghyaṁ samarpayāmi

ācamaniyam

मन्दाकिन्याः समानीतं सुवर्ण कलशे स्थितम् । आचम्यतां महादेव सुगन्धि विमलं जलम् ॥

mandākinyāḥ samānītaṁ suvarṇa kalaśe sthitam ।
ācamyatāṁ mahādeva sugandhi vimalaṁ jalam ॥

O great god, please sip this fragrant and pure water, brought from the celestial Ganges and placed in a golden vessel.

ॐ धं धन्वन्तरये नमः - आचमनियं ।

oṁ dhaṁ dhanvantaraye namaḥ - ācamaniyaṁ ।

snānam

गङ्गा सरस्वतीर् एवा कावेरीभ्यः समाहृतम् । तोयं एतत् सुख स्पर्शं स्नानार्थं प्रतिगृह्येताम् ॥

gaṅgā sarasvatīr evā kāverībhyaḥ samāhṛtam ।
toyaṁ etat sukha sparśaṁ snānārthaṁ pratigṛhyetām ॥

Please accept this water for bathing, which is pleasant to touch, collected from the Ganges, Saraswati, and Kaveri rivers.

ॐ धं धन्वन्तरये नमः - स्नानं समर्पयामि

oṁ dhaṁ dhanvantaraye namaḥ - snānaṁ samarpayāmi

vastram

वस्त्रं च सोम देवत्यं लज्ज यास्तु निवारणं । देह अलङ्कारनं देव गृहाण पीताम्बरम् ॥

vastraṁ ca soma devatyaṁ lajja yāstu nivāraṇaṁ ।
deha alaṅkāranaṁ deva gṛhāṇa pītāmbaram ॥

O god, please accept this yellow garment, associated with the moon god, which removes shame and adorns the body.

ॐ धं धन्वन्तरये नमः - वस्त्र समर्पयामि

oṁ dhaṁ dhanvantaraye namaḥ - vastra samarpayāmi

alaṅkāram

किरीट हार केयूर कुण्डलं कवचं तथा । भूषनानि गृहाणेश मया भक्त्या समर्पितम् ॥

kirīṭa hāra keyūra kuṇḍalaṁ kavacaṁ tathā ।
bhūṣanāni gṛhāṇeśa mayā bhaktyā samarpitam ॥

O Lord, please accept these ornaments offered by me with devotion: a crown, necklace, armlets, earrings, and armor.

ॐ धं धन्वन्तरये नमः - अलङ्कारं ओ ।

oṁ dhaṁ dhanvantaraye namaḥ - alaṅkāraṁ o ।

gandham

कस्तूरी कुंकुमैर् युक्तं घण सार विमिश्रितम् । मलयाचल संभूतं चन्दनं प्रतिगृह्येताम् ॥

kastūrī kuṁkumair yuktaṁ ghaṇa sāra vimiśritam ।
malayācala saṁbhūtaṁ candanaṁ pratigṛhyetām ॥

Please accept this sandalwood paste mixed with musk, saffron, and camphor, originating from the Malaya mountains.

ॐ धं धन्वन्तरये नमः - गन्धं समर्पयामि

oṁ dhaṁ dhanvantaraye namaḥ - gandhaṁ samarpayāmi

akṣatām

शालेयान् चन्द्र वर्णाभान् हरिद्रा राग रञ्जितान् । अक्षतांश्च गृहाणेश अक्षत फलदो भव ॥

śāleyān candra varṇābhān haridrā rāga rañjitān ।
akṣatāṁś ca gṛhāṇeśa akṣata phalado bhava ॥

O Lord, please accept these unbroken rice grains, white as the moon and colored with turmeric. May you grant unbroken success.

ॐ धं धन्वन्तरये नमः - अक्षतां समर्पयामि

oṁ dhaṁ dhanvantaraye namaḥ - akṣatāṁ samarpayāmi

puṣpam

मालादिनि सुगन्धीनि मालत्यादिनि वै प्रभो । मया हृतानि पूजार्थं पुष्पानि प्रतिगृह्येताम् ॥

mālādini sugandhīni mālatyādini vai prabho ।
mayā hṛtāni pūjārthaṁ puṣpāni pratigṛhyetām ॥

O Lord, please accept these fragrant flowers like jasmine and others, which I have brought for worship

ॐ धं धन्वन्तरये नमः - पुष्पं समर्पयामि

oṁ dhaṁ dhanvantaraye namaḥ - puṣpaṁ samarpayāmi

aṅga pūjā

केशवाय नमः - पादौ पूजयामि keśavāya namaḥ - pādau pūjayāmi
नारायणाय नमः - जानुनि पुजयामि nārāyaṇāya namaḥ - jānuni pujayāmi
माधवाय नमः - जङ्घे पुजयामि mādhavāya namaḥ - jaṅghe pujayāmi
गोविन्दाय नमः - उरू पुजयामि govindāya namaḥ - urū pujayāmi
विष्णवे नमः - कटिं पुजयामि viṣṇave namaḥ - kaṭiṁ pujayāmi
मधुसूदनाय नमः - नाभिं पुजयामि madhusūdanāya namaḥ - nābhiṁ pujayāmi
त्रिविक्रमाय नमः - पृष्ठं पुजयामि trivikramāya namaḥ - pṛṣṭhaṁ pujayāmi
वामनाय नमः - उदरं पुजयामि vāmanāya namaḥ - udaraṁ pujayāmi
श्रीधराय नमः - कण्ठं पुजयामि śrīdharāya namaḥ - kaṇṭhaṁ pujayāmi
हृषिकेशाय नमः - हस्तान् पुजयामि hṛṣikeśāya namaḥ - hastān pujayāmi
पद्मनाभाय नमः - मुखं पुजयामि padmanābhāya namaḥ - mukhaṁ pujayāmi
दामोदराय नमः - नेत्रे पुजयामि dāmodarāya namaḥ - netre pujayāmi
धन्वन्तरये नमः - श्रोत्रे पुजयामि dhanvantaraye namaḥ - śrotre pujayāmi
पीयूष कलश हस्ताय - ललाटं पुजयामि pīyūṣa kalaśa hastāya - lalāṭaṁ pujayāmi
आयुर्वेद स्वरूपाय - सिरशे पुजयामि āyurveda svarūpāya - siraśe pujayāmi
सर्व रोग हराय नमः - सर्वाङ्गाणि पुजयामि
sarva roga harāya namaḥ- sarvāṅgāṇi pujayāmi

patra pūjā

अनन्ताय नमः - तुलसि पत्रम् anantāya namaḥ - tulasi patram
समुद्र मथनोद्भवाय - सुमना पत्रम् samudra mathanodbhavāya - sumanā patram
मन्दरोधराय - मन्दार पत्रम् mandarodharāya - mandāra patram
वीभत्स्याय नमः - बिल्व पत्रम् vībhatsyāya namaḥ - bilva patram
विष्णवे नमः - विष्णु क्रान्त पत्रम् viṣṇave namaḥ - viṣṇu krānta patram
जिष्णवे नमः - जाजी पत्रम् jiṣṇnave namaḥ - jājī patram
देवदेवाय नमः - देवदारू पत्रम् devadevāya namaḥ - devadārū patram
मङ्गलाय नमः - मरुग् पत्रम् maṅgalāya namaḥ - marug patram
दैत्य दमनाय नमः - दमन पत्रम् daitya damanāya namaḥ - damana patram
वटवे नमः - वट पत्रम् vaṭave namaḥ - vaṭa patram
अश्वत्थाय नमः - अश्वत्थ पत्रम् aśvatthāya namaḥ - aśvattha patram
रम्भा नर्तन लालसाय - रम्भा पत्रम् rambhā nartana lālasāya - rambhā patram
भीमाय नमः - भूर्ज पत्रम् bhīmāya namaḥ - bhūrja patram
अव्ययाय नमः - अपमार्ग पत्रम् avyayāya namaḥ - apamārga patram
सकल मुनीध्याय - सकल पत्रानि समर्पयामि। sakala munīdhyāya - sakala patrāni samarpayāmi.

puṣpa pūjā

पद्मनाभाय नमः - पद्म पुष्पम् padmanābhāya namaḥ - padma puṣpam
यज्ञ पुरुषाय नमः - यूथिका पुष्पम् yajña puruṣāya namaḥ - yūthikā puṣpam
वेदागमन पारगाय - पातली पुष्पम् vedāgamana pāragāya - pātalī puṣpam
कमनीयाय नमः - करवीर पुष्पम् kamanīyāya namaḥ - karavīra puṣpam
महनीयाय नमः - मल्लिका पुष्पम् mahanīyāya namaḥ - mallikā puṣpam

चन्द्रादित्य नयनाय - चंपक पुष्पम् candrāditya nayanāya - caṁpaka puṣpam
जाढ्या-पहारकाय - जाजी पुष्पम् jāḍhyā-pahārakāya - jājī puṣpam
केतवे नमः - केटकी पुष्पम् ketave namaḥ - keṭakī puṣpam
पारिजात मृडु पदाय - पारिजात पुष्पम् pārijāta mṛḍu padāya - pārijāta puṣpam
मन्दाराद्रि निकेतनाय - मन्दार पुष्पम्। mandārādri niketanāya - mandāra puṣpam.
पुण्य पुरुषाय नमः - पुन्नाग पुष्पम् puṇya puruṣāya namaḥ - punnāga puṣpam
सकलागम स्तुताय - सकल पुष्पाणि समर्पयामि।
sakalāgama stutāya - sakala puṣpāṇi samarpayāmi.

Dhanvantari aṣṭhottara śata-nāmavalliḥ

ॐ धन्वन्तरये नमः । धर्म-ध्वजाय । धरा-वल्लभाय । धीराय । धिषण-वन्द्याय । धर्मिकाय । धर्म नियामकाय । धर्म रूपाय । धीरोदात्त गुणोज्वलाय ॥१० ॥
oṁ dhanvantaraye namaḥ | dharma-dhvajāya | dharā-vallabhāya | dhīrāya | dhiṣaṇa-vandyāya | dharmikāya | dharma niyāmakāya | dharma rūpāya | dhīrodātta guṇojvalāya ॥10 ॥

धर्म-विदे । धरा-धारिणे । धात्रे । धातृ गर्व-भिदे । धात्रे-डिताय । धराधर-रूपाय । धार्मिक प्रियाय । धार्मिक वन्द्याय । धार्मिक जन-ध्याताय । धनदादि समर्चिताय ॥ २० ॥
dharma-vide | dharā-dhāriṇe | dhātre | dhātṛ garva-bhide | dhātre-ḍitāya | dharādhara-rūpāya | dhārmika priyāya | dhārmika vandyāya | dhārmika jana-dhyātāya | dhanadādi samarcitāya ॥ 20

धनञ्जय रूपाय । धनञ्जय वन्द्याय । धनञ्जय सारथये । धिषण रूपाय । धिषण पूज्याय । धिषणाग्रज सेव्याय । धिषणाधिपाय । धिषण्-आदायकाय । धार्मिक शिखामणये । धी-प्रदाय ॥ ३० ॥
dhanañjaya rūpāya | dhanañjaya vandyāya | dhanañjaya sārathaye | dhiṣaṇa rūpāya | dhiṣaṇa pūjyāya | dhiṣaṇāgraja sevyāya | dhiṣaṇādhipāya | dhiṣaṇ-ādāyakāya | dhārmika śikhāmaṇaye | dhī-pradāya ॥ 30 ॥

धी-रुपाय । ध्यान गम्याय । ध्यान ध्यात्रे । ध्यातृ-ध्येय पदाम्बुजाय । धी-स्वरूपिणे । धीर सम्पूज्याय । धीर समर्चिताय । धीर शिखामणये । धुरं धराय । धूप धूपित विग्रहाय ॥ ४० ॥
dhī-rupāya | dhyāna gamyāya | dhyāna dhyātre | dhyātṛ-dhyeya padāmbujāya | dhī-svarūpiṇe | dhīra sampūjyāya | dhīra samarcitāya | dhīra śikhāmaṇaye | dhuraṁ dharāya | dhūpa dhūpita vigrahāya ॥ 40 ॥

धूप दीपादि पूजा प्रियाय । धूमादि मार्ग दर्शकाय । धृष्ट संमर्दनाय । धृष्टद्युम्नाय । धृष्ठद्युम्न स्तुताय । धेनुकासुर सूदनाय । धेनु व्रज रक्षकाय । धेनुकासुर वर-प्रदाय । धैर्याय । धैर्य-वताम् अग्रणये ॥ ५० ॥
dhūpa dīpādi pūjā priyāya | dhūmādi mārga darśakāya | dhṛṣṭa saṁmardanāya | dhṛṣṭadyumnāya | dhṛṣṭhadyumna stutāya | dhenukāsura sūdanāya | dhenu vraja rakṣakāya | dhenukāsura vara-pradāya | dhairyāya | dhairya-vatām agraṇaye ॥ 50

धैर्य-वतां धैर्य-दाय । धैर्य-स्थिरकाय । धीयाम्-पतये । धौम्याय । धौम्येडित पदाय । धौम्यादि मुनिस्तुताय । धर्म मर्ग विघ्न सूदनाय ॥ ६० ॥
dhairya-vatāṁ dhairya-dāya | dhairya-sthirakāya | dhīyām-pataye | dhaumyāya | dhaumyeḍita padāya | dhaumyādi munistutāya | dharma marga vighna sūdanāya ॥ 60 ॥

धर्म राज्ञै । धर्म मार्ग परैक वन्द्याय । धाम त्रय मन्दिराय । धनुर्-वातादि रोगघ्नाय । धूत सर्वाद्य वृन्दाय । धारणा रूपाय । धारणा मार्ग दर्शकाय । ध्यान मार्ग तत्पराय । ध्यान मार्गैक लभ्याय । ध्यान मात्र सुलभाय ॥ ७० ॥

dharma rājñai | dharma mārga paraika vandyāya | dhāma traya mandirāya | dhanur-vātādi rogaghnāya | dhūta sarvādya vṛndāya | dhāraṇā rūpāya | dhāraṇā mārga darśakāya | dhyāna mārga tatparāya | dhyāna mārgaika labhyāya | dhyāna mātra sulabhāya ॥ 70 ॥

ध्यातृ-पाप-हराय । ध्यातृ ताप त्रय हराय । धन धान्य प्रदाय । धन धान्य मत्त सूदनाय । धूम-केतु वर प्रदाय । धर्माध्य-क्षाय । धेनु रक्षाधुरीणाय । धरणी रक्षण धुरीणाय । धृत मोहिनी रूपाय । धीर समर्चिताय ॥ ८० ॥

dhyātṛ-pāpa-harāya | dhyātṛ tāpa traya harāya | dhana dhānya pradāya | dhana dhānya matta sūdanāya | dhūma-ketu vara pradāya | dharmādhya-kṣāya | dhenu rakṣādhurīṇāya | dharaṇī rakṣaṇa dhurīṇāya | dhṛta mohinī rūpāya | dhīra samarcitāya || 80 ||

धृताश्विनी वोदा सरूपाय । धर्माभिवृद्धि कर्त्रे । धर्म गोप्त्रे धर्म बान्धवाय । धर्म हेतवे । धार्मिक व्रज रक्षा धुरीणाय । धनञ्जयादि वर प्रदाय । धनञ्जय सेवा तुष्टाय । धनञ्जय सहाय्य कृते । धनञ्जय स्तोत्र पात्राय ॥ ९० ॥

dhṛtāśvinī vodā sarūpāya | dharmābhivṛddhi kartre | dharma goptre dharma bāndhavāya | dharma hetave | dhārmika vraja rakṣā dhurīṇāya | dhanañjayādi vara pradāya | dhanañjaya sevā tuṣṭāya | dhanañjaya sahāyya kṛte | dhanañjaya stotra pātrāya || 90 ||

धनञ्जय गर्व हर्त्रे । धनञ्जय स्तुति हर्षिताय । धनञ्जय वियोग खिन्नाय । धनञ्जय गीतोपदेश कृते । धर्माधर्म विचार परायणाय । धर्म साक्षिणे । धर्म नियामकाय । धर्म धुरन्धराय । धन दृप्त जन दूरगाय । धर्म पालकाय ॥ १०० ॥

dhanañjaya garva hartre | dhanañjaya stuti harṣitāya | dhanañjaya viyoga khinnāya | dhanañjaya gītopadeśa kṛte | dharmādharma vicāra parāyaṇāya | dharma sākṣiṇe | dharma niyāmakāya | dharma dhurandharāya | dhana dṛpta jana dūragāya | dharma pālakāya || 100 ||

धर्म मार्गोपदेश कृद्वन्द्याय । धर्म तनय वन्द्याय । धर्म रूप विदुर वन्द्याय । धर्म-तनय स्तुत्याय । धी धृति स्मृति प्रदाय । धर्म-तनय संसेव्याय । धिक्कृत महारोगार्णवाय । धारा मृत हस्ताय ॥ १०८ ॥ धृतामृत कलश कराय श्रीमद् धन्वन्तरये नमः ॥

dharma mārgopadeśa kṛdvandyāya | dharma tanaya vandyāya | dharma rūpa vidura vandyāya | dharma-tanaya stutyāya | dhī dhṛti smṛti pradāya | dharma-tanaya saṁsevyāya | dhikkṛta mahārogārṇavāya | dhārā mṛta hastāya || 108 || dhṛtāmṛta kalaśa karāya śrīmad dhanvantaraye namaḥ ||

dhūpam

धूपं सुगन्धं उद्भूतं देव दारु विमिश्रीतम् । कपिलाज्येन संयुक्तं आघ्रेयं प्रतिगृह्यताम् ॥
dhūpaṁ sugandhaṁ udbhūtaṁ deva dāru vimiśrītam |
kapilājyena saṁyuktaṁ āghreyaṁ pratigṛhyatām ||

Please accept this fragrant incense mixed with sacred wood and cow's ghee, offered for your pleasure.

ॐ धं धन्वन्तरये नमः - धूपम् आघ्रापयामि
oṁ dhaṁ dhanvantaraye namaḥ - dhūpam āghrāpayāmi

dīpam

साज्यं च वर्ति संयुक्तं वह्निना योजितं मया । दीपं गृहान देवेश लक्ष्मी बन्ध्नमोऽस्तुते ॥
sājyaṁ ca varti saṁyuktaṁ vahninā yojitaṁ mayā |
dīpaṁ gṛhāna deveśa lakṣmī bandhnamo’stute ||

O Lord of gods, please accept this lamp with its wick and ghee, lit by me with fire. May it bring prosperity.

ॐ धं धन्वन्तरये नमः - दीपं दर्शयामि
oṁ dhaṁ dhanvantaraye namaḥ - dīpaṁ darśayāmi

naivedyam

अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् । भक्ष्य भोज्यादि संयुक्तं नैवेद्यं प्रतिगृह्यताम्
annaṁ catur vidhaṁ svādu rasaiḥ ṣaḍbhiḥ samanvitam |
bhakṣya bhojyādi saṁyuktaṁ naivedyaṁ pratigṛhyatām

Please accept this food offering of four kinds, endowed with six tastes, along with various delicacies to eat and enjoy.

ॐ धं धन्वन्तरये नमः - नैवेद्य नैवेदयामि

मध्ये पानियं समर्पयामि । उत्तर पोषनं समर्पयामि । हस्त प्रक्षालनं, पाद प्रक्षालनं समर्पयामि । पुनर् आचमनं सम्पर्पयामि ॥

oṁ dhaṁ dhanvantaraye namaḥ - naivedya naivedayāmi
madhye pāniyaṁ samarpayāmi । uttara poṣanaṁ samarpayāmi ।
hasta prakṣālanaṁ, pāda prakṣālanaṁ samarpayāmi ।
punar ācamanaṁ samparpayāmi ॥

tāmbūlam

एला लवङ्ग कर्पूर क्रमुकादि समन्वितम् । ताम्बूल दल संउक्तं ताम्बूलं प्रतिगृह्यताम् ॥

elā lavaṅga karpūra kramukādi samanvitam ।
tāmbūla dala saṁuktaṁ tāmbūlaṁ pratigṛhyatām ॥

Please accept this betel offering prepared with cardamom, cloves, camphor, areca nut and betel leaves.

ॐ धं धन्वन्तरये नमः - ताम्बूलं समर्पयामि ॥ ॐ धं धन्वन्तरये नमः - सुवर्ण पुष्पं समर्पयामि

oṁ dhaṁ dhanvantaraye namaḥ - tāmbūlaṁ samarpayāmi ॥
oṁ dhaṁ dhanvantaraye namaḥ - suvarṇa puṣpaṁ samarpayāmi

prārthana

बुद्धिं शक्तिं तथोत्साहं आयुरारोग्यं एव च । देहान्ते तव सायुज्यं देहि धन्वन्तरे मम ॥

buddhiṁ śaktiṁ tathotsāhaṁ āyur ārogyaṁ eva ca ।
dehānte tava sāyujyaṁ dehi dhanvantare mama ॥

O Dhanvantari, grant me intelligence, strength, enthusiasm, long life, good health, and union with you at the end of this life.

नमस्ते भगवन् भूयो नमस्ते धरणी-धर । नमस्ते देव-देवेश नमस्ते भक्त-वत्सल ॥

namaste bhagavan bhūyo namaste dharaṇī-dhara ।
namaste deva-deveśa namaste bhakta-vatsala ॥

Salutations to you, O Lord, again and again. Salutations to you, O Supporter of the Earth. Salutations to you, O God of gods. Salutations to you, O Lover of devotees.

ॐ धं धन्वन्तरये नमः - इति मानसा अभिष्ट प्रार्थनां करोमि

oṁ dhaṁ dhanvantaraye namaḥ - iti mānasā abhiṣṭa prārthanāṁ karomi

mantra puṣpam

देवं सहस्र-शीर्शं च विश्व संभुवम् । विश्व शान्ति प्रदातारं मन्त्र पुष्पं गृहाण भो ॥

devaṁ sahasra-śīrśaṁ ca viśva saṁbhuvam ।
viśva śānti pradātāraṁ mantra puṣpaṁ gṛhāṇa bho ॥

O God with a thousand heads, creator of the universe, bestower of universal peace, please accept this offering of mantras as flowers.

ॐ धं धन्वन्तरये नमः - इति मन्त्र पुष्पं समर्पयामि

oṁ dhaṁ dhanvantaraye namaḥ - iti mantra puṣpaṁ samarpayāmi

pradakṣiṇam

यानि कानि च पापानि जन्मान्तर कृतानि च । तानि तानि प्रनश्यन्ति प्रदक्षिन पदे पदे ॥

yāni kāni ca pāpāni janmāntara kṛtāni ca ।
tāni tāni pranaśyanti pradakṣina pade pade ॥

Whatever sins have been committed in this or previous births, may they be destroyed with each step of circumambulation.

आवाहनं न जानामि न जानामि तव अर्चनं । विसर्जनं न जानामि क्षम्यतां परमेश्वर ॥

āvāhanaṁ na jānāmi na jānāmi tava arcanaṁ ।
visarjanaṁ na jānāmi kṣamyatāṁ parameśvara ॥

I do not know how to invoke you, worship you, or bid you farewell. Please forgive me, O Supreme Lord.

अपराध सहस्राणि कृइयते ऽहर्निषं मया । दासोऽहं इति मां मत्वा क्षमस्व परमेश्वर ॥

aparādha sahasrāṇi kṛiyate 'har-niṣaṁ mayā ।
dāso'haṁ iti māṁ matvā kṣamasva parameśvara ॥

Thousands of offenses I commit day and night. Considering me your servant, please forgive me, O Supreme Lord.

रूपं देहि जयं देहि यशो देहि द्विषो जहि । पुत्रान् देहि धनं देहि स्वास्थ्यं च देहि मे सदा ॥

rūpaṁ dehi jayaṁ dehi yaśo dehi dviṣo jahi ।
putrān dehi dhanaṁ dehi svāsthyaṁ ca dehi me sadā ॥

Grant me beauty, victory, fame, and destroy my enemies. Grant me children, wealth, and good health always.

उपायन दानं छत्र चामर व्यजन दर्पन नृत्य गीत वाद्य अन्दोलिकादि समस्त राजोपचारान् समर्पयामि ॥

upāyana dānaṁ chatra cāmara vyajana darpana nṛtya gīta vādya andolikādi samasta rājopacārān samarpayāmi ॥

I offer you all the royal honors - gifts, umbrella, fan, mirror, dance, music, palanquin and other regal services.

Dhanvantari stotram

क्षीरोद मथनोद्भूतं दिव्य गन्धानुलेपितम् । सुधा कलश-हस्तं तं वन्दे धन्वन्तरिं हरिम् ॥ १ ॥

kṣīroda mathanodbhūtaṁ divya gandhānulepitam ।
sudhā kalaśa-hastaṁ taṁ vande dhanvantariṁ harim ॥ 1 ॥

I worship Lord Dhanvantari, the divine incarnation emerged from the churning of the milk ocean, adorned with heavenly fragrance, holding the pot of nectar in his hand. I bow down to Lord Hari, the one who possesses the shining splendor and dispels darkness.

नमो लोक-त्रयाध्यक्ष तेजसा जित-भास्कर । नमो विष्णो नमो जिष्णो नमस्ते कैटभार्दन ॥ २ ॥

namo loka-trayādhyakṣa tejasā jita-bhāskara ।
namo viṣṇo namo jiṣṇo namaste kaiṭabhārdana ॥ 2 ॥

Salutations to the Lord who presides over the three realms, whose radiance conquers the brilliance of the sun. Salutations to Lord Vishnu, the conqueror of enemies, and salutations to you, O annihilator of the demon Kaitabha.

नमो सर्ग क्रिया कर्त्रे जगत्-पालये नमः । नमस्स्मृतार्त्ति नाशाय नमः पुष्कर-मालिने ॥ ३ ॥

namo sarga kriyā kartre jagat-pālaye namaḥ ।
namas smṛtārtti nāśāya namaḥ puṣkara-māline ॥ 3 ॥

Salutations to the creator of the universe and the sustainer of cosmic activities. Salutations to the protector of the world, and salutations to you, adorned with a garland of lotus flowers, who destroys the afflictions caused by ignorance.

दिव्यौषधि स्वरूपाय सुधा कलश-पाणये । शङ्ख-चक्र-गदा पद्म धारिणे वनमालिने ॥ ४ ॥

divyauṣadhi svarūpāya sudhā kalaśa-pāṇaye ।
śaṅkha-cakra-gadā padma dhāriṇe vanamāline ॥ 4 ॥

Salutations to the one who embodies divine medicine, holding a pot of nectar in his hand. Adorned with a conch, discus, mace, and lotus, and wearing a garland made of forests.

देवेन्द्रादि सुरेड्याय नमः क्षीराब्धि जन्मने । निर्गुणाय विशेषाय हरये ब्रह्म-रूपिणे ॥ ५ ॥

devendrādi sureḍyāya namaḥ kṣīrābdhi janmane ।
nir-guṇāya viśeṣāya haraye brahma-rūpiṇe ॥ 5 ॥

I bow down to the Lord of gods headed by Indra, who took birth from the ocean of milk. Salutations to the formless one, the special one, the embodiment of Lord Hari.

जगत्-प्रतिष्ठितं यत्र जगतां यो न दृश्यते । नमः स्थूलाति-सूक्ष्माय तस्मै देवाय शङ्खिने ॥ ६ ॥

jagat-pratiṣṭhitaṁ yatra jagatāṁ yo na dṛśyate ।
namaḥ sthūlāti-sūkṣmāya tasmai devāya śaṅkhine ॥ 6 ॥

That which establishes the world, yet remains unseen by the world. Salutations to the Lord who transcends the gross and subtle aspects of existence, the one who holds the divine conch.

यन्न पश्यन्ति पश्यन्तं जगदप्यखिलं नराः । अपश्यद्भिर् जगद् अद्यत्र दृश्यते हृदि संस्थितः ॥ ७

yanna paśyanti paśyantaṁ jagad-apyakhilaṁ narāḥ ।
apaśyadbhir jagad adyatra dṛśyate hṛdi saṁsthitaḥ ॥ 7 ॥

Men perceive the world that is seen, but they do not perceive the one who sees. The world is seen by those who are devoid of vision, but it is perceived by the one residing in the heart.

यस्मिन् अन्नं पयश्चैव नद्यश्चैवाखिलं जगत् । तस्मै नमोस्तु जगतामाधाराय नमो नमः ॥ ८ ॥

yasminn annaṁ payaścaiva nadyaścaivākhilaṁ jagat ।
tasmai namostu jagatām-ādhārāya namo namaḥ ॥ 8 ॥

In whom resides food, drink, and all the rivers of the world. Salutations to the support of the universe, again and again.

आद्यः प्रजापतिर्यश्च यः पितृणां परः पतिः । पतिः सुराणां यस्तस्मै नमः कृष्णाय वेधसे ॥ ९ ॥

ādyaḥ prajāpatir yaśca yaḥ pitṛṇāṁ paraḥ patiḥ ।
patiḥ surāṇāṁ yas-tasmai namaḥ kṛṣṇāya vedhase ॥ 9 ॥

The first progenitor, the supreme lord of the ancestors, the husband of the goddess of wealth. The lord of the gods, salutations to Lord Krishna, the creator of the Vedas.

ये प्रवृत्तौ निवृत्तौ च इज्यते कर्मभिः स्वकैः । स्वर्गापवर्ग फलदो नमस्-तस्मै गदा भृते ॥ १० ॥

ye pravṛttau nivṛttau ca ijyate karmabhiḥ svakaiḥ ।
svargāpavarga phalado namas-tasmai gadā bhṛte ॥ 10 ॥

Salutations to the wielder of the mace, who bestows the fruits of heaven and liberation, for the performance and cessation of actions by individuals according to their own duties.

यश्चिन्त्यमानो मनसा सद्यः पापं व्यपोहति । नमस्तस्मै विशुद्धाय वराय हरि-मेधसे ॥ ११ ॥

yaścintyamāno manasā sadyaḥ pāpaṁ vyapohati ।
namas tasmai viśuddhāya varāya hari-medhase ॥ 11 ॥

Salutations to the pure one, who, by the power of the mind, instantly dispels sinful thoughts, O Lord Vishnu, the embodiment of sacrifice.

यं बुद्ध्वा सर्व भूतानि देव देवेशम् अव्ययम् । न पुनर्जन्म मरणे प्राप्नुवन्ति नमामि तम् ॥ १२ ॥

yaṁ buddhvā sarva bhūtāni deva deveśam avyayam ।
na punar janma maraṇe prāpnuvanti namāmi tam ॥ 12 ॥

I bow down to the imperishable Lord of gods, who, when realized, frees all beings from the cycle of birth and death. I offer my salutations to that supreme being.

यो यज्ञे यज्ञ-परमैः इज्यते यज्ञ संज्ञितः । तं यज्ञ-पुरुषं विष्णुं नमामि प्रभुम् ईश्वरम् ॥१३

yo yajñe yajña-paramaiḥ ijyate yajña saṁjñitaḥ ।
taṁ yajña-puruṣaṁ viṣṇuṁ namāmi prabhum īśvaram ॥ 13 ॥

I offer my salutations to Lord Vishnu, the supreme deity, the ultimate object of sacrifice, who is known as Yajna. He is the Lord and the controller.

गीयते सर्व वेदेषु वेदविद्भिस्त्वषां पतिः । यस्तस्मै वेद-वेद्याय विष्णवे जिष्णवे नमः ॥ १४ ॥

gīyate sarva vedeṣu veda-vidbhistvaṣāṁ patiḥ ।
yas-tasmai veda-vedyāya viṣṇave jiṣṇave namaḥ ॥ 14 ॥

He is sung in all the Vedas by those who have realized the essence of the Vedas. Salutations to the knower of the Vedas, the victorious Lord Vishnu.

यतो विश्वं समुत्पन्नं यस्मिंश्च लयम्-एष्यति । विश्वोद्भव प्रतिष्ठाय नमस्तस्मै महात्मने ॥१५ ॥

yato viśvaṁ samutpannaṁ yasmiṁśca layam-eṣyati ।
viśvodbhava pratiṣṭhāya namas-tasmai mahātmane ॥15 ॥

From whom the entire universe is manifested and in whom it ultimately dissolves. Salutations to that great soul who is the source and foundation of the universe.

ब्रह्मादि स्तंब पर्यन्तं येन विश्वम् इदं ततम् । माया जालं समुत्तर्तुं तम् उपेन्द्रं नमाम्यहम् ॥

brahmādi staṁba paryantaṁ yena viśvam idaṁ tatam ।
māyā jālaṁ samuttarttuṁ tam upendraṁ namāmyaham ॥

I bow down to Lord Upendra, by whom this entire universe, from Brahma to the end, is pervaded. He is the one who transcends the web of illusion.

विषाद तोष रोषाद्यैः योऽजस्रं सुख दुःखजैः । नृत्यत्यखिल भूतस्थः तम् उपेन्द्रं नमाम्यहम् ॥१७
viṣāda toṣa roṣādyaiḥ yo'jasraṁ sukha duḥkhajaiḥ ।
nṛtyatyakhila bhūtasthaḥ tam upendraṁ namāmyaham ॥17

I offer my salutations to Lord Upendra, who dances in joy, sorrow, anger, and other emotions, and who continually dances in the hearts of all beings.

यम् आराध्य विशुद्धेन कर्मणा मनसागिरा । तरन्त्य विद्याम् अखिलान् आदिवैद्यं नमाम्यहम् ॥१८
yam ārādhya viśuddhena karmaṇā manasā girā ।
tarantya vidyām akhilān ādi-vaidyaṁ namāmyaham ॥ 18 ॥

I offer my salutations to Lord Upendra, who, through pure actions and the power of the mind, helps transcend all knowledge and the primordial Vedic teachings.

यः स्थितो विश्वरूपेण विभर्त्ति निखिलौषधीः । तं रत्न कलशोद्भासि हस्तं धन्वन्तरिं नमः ॥ १९
yaḥ sthito viśva-rūpeṇa vibhartti nikhilauṣadhīḥ ।
taṁ ratna kalaśodbhāsi hastaṁ dhanvantariṁ namaḥ ॥ 19 ॥

I offer my salutations to Lord Dhanvantari, who, in his universal form, sustains and nourishes all herbs and plants, shining like a gem-filled vessel in his hand.

विश्वं विश्वपतिं विष्णुं तं नमामि प्रजापतिं । मूर्त्या चासुर मय्या तु तद्विधानि निहन्ति यः ॥२०॥
viśvaṁ viśva-patiṁ viṣṇuṁ taṁ namāmi prajāpatiṁ ।
mūrtyā cāsura mayyā tu tad-vidhāni nihanti yaḥ ॥ 20 ॥

I bow down to Lord Vishnu, the Lord of the universe and the creator of beings. He destroys the enemies according to his divine form, defeating them with his power.

रात्रि रूपः सूर्य रूपः भजेत्तं साम्य रूपिणम् । हन्ति विद्या प्रदानेन यस्तु ह्यज्ञानजं तमः ॥ २१ ॥
rātri rūpaḥ sūrya rūpaḥ bhajettaṁ sāmya rūpiṇam ।
hanti vidyā pradānena yastu hyajñānajaṁ tamaḥ ॥ 21 ॥

The one who assumes the form of night and the form of the sun, I worship that Lord who possesses equality. By bestowing knowledge, he destroys ignorance and darkness.

यश्च भेषज रूपेण जगदाप्यायते सदा । यस्याक्षिणी चन्द्र सूर्यौ सर्व लोक शुभं करौ ॥ २२ ॥
yaśca bheṣaja rūpeṇa jagadāpyāyate sadā ।
yasyākṣiṇī candra sūryau sarva loka śubhaṁ karau ॥ 22 ॥

He who continuously benefits the world in the form of medicine, whose eyes are like the shining sun and moon, the auspicious dispellers of darkness for all worlds.

पश्यतः कर्म सततं तं च धन्वन्तरिं नमः । यस्मिन् सर्वेश्वरे विश्वं जगत्स्थाव जरङ्गमम् ॥ २३ ॥
paśyataḥ karma satataṁ taṁ ca dhanvantariṁ namaḥ ।
yasmin sarveśvare viśvaṁ jagatsthāva jaraṅgamam ॥ 23 ॥

I offer my salutations to Lord Dhanvantari, who constantly observes the actions of beings. In whom the entire universe, both stationary and moving, resides.

आभाति तमजं विष्णुं नमामि प्रभुमव्ययम् । एवं स्तुतोऽथ भगवान् देवो धन्वन्तरि सदा ॥ २४ ॥
ābhāti tamajaṁ viṣṇuṁ namāmi prabhumavyayam ।
evaṁ stuto'tha bhagavān devo dhanvantari sadā ॥ 24 ॥

I bow down to the eternal Lord Vishnu, who shines brilliantly and dispels all darkness. Thus, the Lord Dhanvantari, the divine deity, is praised.

इति श्री मत्स्य पुराणान्तर्गत धन्वन्तरि स्तोत्रं सम्पूर्णम् ॥
iti śrī matsya purāṇāntargata dhanvantari stotraṁ sampūrṇam ॥

अनेन यथा लब्धोपचार पूजा विधानेन धन्वन्तरि सुप्रीत सुप्रसन्नो वरदो भवतु ॥
anena yathā labdhopacāra pūjā vidhānena dhanvantariḥ suprītaḥ suprasanno varado bhavatu ॥

Śrī Dhanvantari japa kalpa

ॐ अष्य श्री धन्वन्तरि माला महामन्त्र भरद्वाज रिसिः । गायत्रि छन्दः । धन्वन्तरि देवता । धन्वन्तरि प्रसाद सिद्ध्यर्थे जपे विनियोगः ॥

oṁ aṣya śrī dhanvantari mālā mahāmantra bharadvāja risiḥ । gāyatri chandaḥ । dhanvantari devatā । dhanvantari prasāda siddhyarthe jape viniyogaḥ ॥

nyāsa

ॐ ह्रां अंगुष्ठाभ्यां नमः oṁ hrāṁ aṅguṣṭhābhyāṁ namaḥ

ॐ ह्रीं तर्जनिभ्यां नमः oṁ hrīṁ tarjanibhyāṁ namaḥ

ॐ ह्रूं मध्यमाभ्यां नमः oṁ hrūṁ madhyamābhyāṁ namaḥ

ॐ ह्रैं अनामिकाभ्यां नमः oṁ hraiṁ anāmikābhyāṁ namaḥ

ॐ ह्रौं कनिष्ठिकाभ्यां नमः oṁ hrauṁ kaniṣṭhikābhyāṁ namaḥ

ॐ धं धन्वन्तरे नमः करतल कर पृष्ठाभ्यां नमः
oṁ dhaṁ dhanvantare namaḥ karatala kara pṛṣṭhābhyāṁ namaḥ

ॐ ह्रां हृदयाय नमः oṁ hrāṁ hṛdayāya namaḥ

ॐ ह्रीं शिरसे स्वाहा oṁ hrīṁ śirase svāhā

ॐ ह्रूं शिखायै वषट् oṁ hrūṁ śikhāyai vaṣaṭ

ॐ ह्रैं कवचाय हुं oṁ hraiṁ kavacāya huṁ

ॐ ह्रौं नेत्र त्रयाय वौषट् oṁ hrauṁ netra trayāya vauṣaṭ

ॐ धं धन्वन्तरे नमः अस्त्राय फट्, इति दिग् बन्धः।
oṁ dhaṁ dhanvantare namaḥ astrāya phaṭ, iti dig bandhaḥ.

dhyānam

नमामि धन्वन्तरिम् आदिदेवं सुरासुरैर् वन्दित पाद पद्मम् ।
लोके जरा रोग भय मृत्यु नाशं दातारं ईसं विविधौसधीनाम् ॥

namāmi dhanvantarim ādidevaṁ surāsurair vandita pāda padmam ।
loke jarā roga bhaya mṛtyu nāśaṁ dātāraṁ īsaṁ vividhausadhīnām ॥

I bow to Dhanvantari, the primordial god, whose lotus feet are worshipped by both gods and antigods. In this world, he destroys old age, disease, fear, and death, the lord who bestows various medicines

mālā mantra

१. ॐ ह्रां ह्रीं ह्रूं धं धन्वन्तरये नमः स्वाहा
1. oṁ hrāṁ hrīṁ hrūṁ dhaṁ dhanvantaraye namaḥ svāhā

२. भूमौ स्खलित पादानां भूमिर् एव अवलम्बनं । त्वयि जातापराधानां त्वं एव शरणं मम ॥
2. bhūmau skhalita pādānāṁ bhūmir eva avalambanaṁ । tvayi jātāparādhānāṁ tvaṁ eva śaraṇaṁ mama ॥

३. ॐ नमो भगवन् वासुदेव धन्वन्तरे, महा-विष्णु नारायण वैकुण्ट, आरोग्यं देहि देहि, दिर्घायुष्यं देहि देहि, श्री मूर्तये नमस्स्वाहा
3. oṁ namo bhagavan vāsudeva dhanvantare, mahā-viṣṇu nārāyaṇa vaikuṇṭa, ārogyaṁ dehi dehi, dirghāyuṣyaṁ dehi dehi, śrī mūrtaye namas-svāhā

वासुदेवाय धन्वन्त्रये अमृत कलश हस्ताय सर्व आमय नाशनाय त्रैलोक्य नाथाय श्रि महा विष्णवे नमः

4. vāsudevāya dhanvantraye amṛta kalaśa hastāya sarva āmaya nāśanāya trailokya nāthāya śri mahā viṣṇave namaḥ ॥

HANUMĀN PŪJĀ VIDHĀNAM

saṅkalpaḥ— हरिः ॐ तत् सत् ..... श्रीमन् नारायण प्रीत्यर्थम् । श्री आञ्जनेय स्वामि उद्दिश्य, श्री आञ्जनेय स्वामि पूर्ण कृपा कटाक्ष सिद्ध्यर्थं, श्री आञ्जनेय स्वामि प्रसाद सिद्ध्यर्थं, श्री सीता-राम-भक्त श्री-हनुमत् पूजनं करिष्ये ॥

— hariḥ oṁ tat sat ..... śrīman nārāyaṇa prīty-artham । śrī āñjaneya svāmi uddiśya, śrī āñjaneya svāmi pūrṇa kṛpā kaṭākṣa siddhyarthaṁ, śrī āñjaneya svāmi prasāda siddhyarthaṁ, śrī sītā-rāma-bhakta śrī-hanumat pūjanaṁ kariṣye ॥

Hari Om Tat Sat... For the pleasure of Lord Narayana, I shall perform the worship of Sri Hanuman, the devotee of Sri Sita and Rama, with the purpose of obtaining the complete grace and blessings of Sri Anjaneya Swami, and to attain the prasad (divine grace) of Sri Anjaneya Swami.

dhyānam

बालार्कायुत तेजसं त्रिभुवन् प्रक्षोभकं सुन्दरम् । सुग्रीवादि समस्त वानर-गणैः संसेव्य पादाम्बुजम् ॥
नादेनैव समस्त राक्षस गणान् सन्त्रासयन्तं प्रभु । श्रीमद् राम पदाम्बुज स्मृति-रतं ध्यायामि वातात्मजम् ॥

bālārkāyuta tejasaṁ tribhuvan prakṣobhakaṁ sundaram ।
sugrīvādi samasta vānara-gaṇaiḥ saṁsevya pādāmbujam ॥
nādenaiva samasta rākṣasa gaṇān santrāsayantaṁ prabhu ।
śrīmad rāma padāmbuja smṛti-rataṁ dhyāyāmi vātātmajam ॥

Hanuman has the effulgence of a thousand young suns and his beauty disturbs the three worlds. Sugriva and all the monkeys worshiped the lotus feet of the Lord.
With his roar Lord Hanuman terrified all the hosts of demons. I meditate upon the son of the wind, who is engaged in remembrance of the lotus feet of the blessed Lord Rāma.

ॐ हौं हणुमते नमः oṁ hauṁ haṇumate namaḥ
ॐ नमो भगवते आञ्जनेयाय महाबलाय स्वाहा ।
oṁ namo bhagavate āñjaneyāya mahābalāya svāhā ।
ॐ हनुमते रुद्रात्मकाय हुं फट् । oṁ hanumate rudrātmakāya huṁ phaṭ ।

upacāram

आसनम् । पाद्यम् । अर्घ्यम् । आचमनीयम् । स्नानम् । स्नानानन्तरम् पुनर् आचमनीयम् । वस्त्रं यज्ञोपवीतम् उत्तरीय आभरणार्थे इमे अक्षताः । गन्धान् । हरिद्रा चूर्णम् । गन्धस्योपरि अक्षतान् । पुष्पाणि समर्पयामि —
āsanam । pādyam । arghyam । ācamanīyam । snānam । snānānantaram punar ācamanīyam । vastraṁ yajñopavītam uttarīya ābharaṇārthe ime akṣatāḥ । gandhān । haridrā cūrṇam । gandhasyopari akṣatān । puṣpāṇi samarpayāmi —

ॐ श्री आञ्जनेयाय नमः । वायु-पुत्राय । ब्रह्मचारिणे । सर्वारिष्ट निवारकाय । शुभ-कराय । पिङ्गलाक्षाय । अक्षापहाय । सीतान्-वेषण तत्पराय । कपि-वराय । कोटीन्दु सूर्य प्रभाय । लङ्का-द्वीप भयङ्कराय । सकल-दाय । सुग्रीव सम्मानिताय । देवेन्द्रादि समस्त-देव विनुताय । काकुतस्थ दूताय । ॐ हनुमते नमः ॥
oṁ śrī āñjaneyāya namaḥ । vāyu-putrāya । brahmacāriṇe । sarvāriṣṭa nivārakāya । śubha-karāya । piṅgalākṣāya । akṣāpahāya । sītān-veṣaṇa tatparāya । kapi-varāya । koṭīndu sūrya prabhāya । laṅkā-dvīpa bhayaṅkarāya । sakala-dāya । sugrīva sammānitāya । devendrādi samasta-deva vinutāya । kākutastha dūtāya । oṁ hanumate namaḥ ॥

Hanumad Aṣṭottara-śatam

ॐ आञ्जनेयाय नमः । महावीराय । हनुमते । मारुतात्मजाय । तत्त्व-ज्ञान-प्रदाय । सीता-देवी-मुद्रा-प्रदायकाय । अशोक-वनिका-च्छेत्त्रे । सर्व-माया-विभञ्जनाय । सर्व-बन्ध-विमोक्त्रे । रक्षो-विध्वम्सकाय ॥ १० ॥

oṁ āñjaneyāya namaḥ । mahāvīrāya । hanumate । mārutātmajāya । tattva-jñāna-pradāya । sītā-devī-mudrā-pradāyakāya । aśoka-vanikā-cchettre । sarva-māyā-vibhañjanāya । sarva-bandha-vimoktre । rakṣo-vidhvamsakāya ॥ 10 ॥

पर-विद्या-परी-हरय । पर-शौर्य-विनाशनाय । पर-मन्त्र-निरा-कर्त्रे । पर-यन्त्र-प्रभेदकाय । सर्व-ग्रह-विनाशिने । भीमसेन-सहाय-कृते । सर्व-दुःख-हराय । सर्व-लोक-चारिणे । मनोजवाय । परिजातद्रु-मूलस्थाय ॥ २० ॥

para-vidyā-parī-haraya । para-śaurya-vināśanāya । para-mantra-nirā-kartre । para-yantra-prabhedakāya । sarva-graha-vināśine । bhīmasena-sahāya-kṛte । sarva-duḥkha-harāya । sarva-loka-cāriṇe । manojavāya । parijātadru-mūlasthāya ॥ 20 ॥

सर्व-मन्त्र-स्वरूपवते । सर्व-तन्त्र-स्वरूपिणे । सर्व-यन्त्रात्मकाय । कपीश्वराय । महा-कायाय । सर्व-रोग-हराय । प्रभवे । बल-सिद्धि-कराय । सर्व-विद्या-संपत् प्रदायकाय । कपि-सेना-नायकाय ॥ ३० ॥

sarva-mantra-svarūpavate । sarva-tantra-svarūpiṇe । sarva-yantrātmakāya । kapīśvarāya । mahā-kāyāya । sarva-roga-harāya । prabhave । bala-siddhi-karāya । sarva-vidyā-saṁpat pradāyakāya । kapi-senā-nāyakāya ॥ 30 ॥

भविष्यच्-चतुराननाय । कुमार-ब्रह्मचारिणे । रक्त-कुण्डल-दीप्तिमते । चञ्चलद्वाल-सन्नद्ध-लम्ब-मान-शिखोज्वलाय । गन्धर्व-विद्या तत्त्व-ज्ञाय । महा-बल-पराक्रमाय । कारा-गृह-विमोक्त्रे । शृङ्गकला-बन्ध-मोचकाय । सागरोत्तारकाय । प्राज्ञाय ॥ ४० ॥

bhaviṣyac-caturānanāya । kumāra-brahmacāriṇe । rakta-kuṇḍala-dīptimate । cañcaladvāla-sannaddha-lamba-māna-śikhojvalāya । gandharva-vidyā tattva-jñāya । mahā-bala-parākramāya । kārā-gṛha-vimoktre । śṛṅgkalā-bandha-mocakāya । sāgarottārakāya । prājñāya ॥ 40 ॥

राम-दूताय । प्रतापवते । वानराय । केसरि-सुताय । सीता-शोक-निवारणाय । अञ्जन-गर्भ-सम्भूताय । बालार्क-सदृशाननाय । विभीषण-प्रियकराय । दश-ग्रीव-कुलान्तकाय । लक्ष्मण-प्राण-दात्रे ॥ ५० ॥

rāma-dūtāya । pratāpavate । vānarāya । kesari-sutāya । sītā-śoka-nivāraṇāya । añjana-garbha-sambhūtāya । bālārka-sadṛśānanāya । vibhīṣaṇa-priyakarāya । daśa-grīva-kulāntakāya । lakṣmaṇa-prāṇa-dātre ॥ 50 ॥

वज्र-काय । महा-द्युतये । चिरञ्जीविने । राम-भक्ताय । दैत्य-कार्य-विघातकाय । अक्ष-हन्त्रे । काञ्च-नाभाय । पञ्च-वक्त्राय । मह-तपसे । लङ्किणी-भञ्जनाय ॥ ६० ॥

vajra-kāya । mahā-dyutaye । cirañjīvine । rāma-bhaktāya । daitya-kārya-vighātakāya । akṣa-hantre । kāñca-nābhāya । pañca-vaktrāya । maha-tapase । laṅkiṇī-bhañjanāya ॥ 60 ॥

श्रीमते । सिंहिका-प्राण-भञ्जनाय । गन्ध-मादन-शैलस्थाय । लङ्का-पुर-विदाहकाय । सुग्रीव-सचिवाय । धीराय । शूराय । दैत्य-कुलान्तकाय । सुरार्चितय । महातेजसे ॥ ७० ॥

śrīmate । siṁhikā-prāṇa-bhañjanāya । gandha-mādana-śailasthāya । laṅkā-pura-vidāhakāya । sugrīva-sacivāya । dhīrāya । śūrāya । daitya-kulāntakāya । surārcitaya । mahātejase ॥ 70 ॥

राम-चूडामणि-प्रदाय । काम-रूपिणे । पिङ्गलाक्षाय । वार्धि-मैनाक-पूजिताय । कबली-कृत-मार्ताण्ड-मण्डलाय । विजितेन्द्रियाय । रम-सुग्रीव-सन्धात्रे । महा-रावण-मर्दनाय । स्फटिकाभाय । वाग्-अधीशाय ॥ ८० ॥

rāma-cūḍāmaṇi-pradāya । kāma-rūpiṇe । piṅgalākṣāya । vārdhi-maināka-pūjitāya । kabalī-kṛta-mārtāṇḍa-maṇḍalāya । vijitendriyāya । rama-sugrīva-sandhātre । mahā-rāvaṇa-mardanāya ।

sphaṭikābhāya । vāg-adhīśāya ॥ 80 ॥

नव-व्याकृति-पिण्डिताय । चतुर्बाहवे । दीन-बन्धवे । महात्मने । भक्त-वत्सलाय । सञ्जीवन-नगा-हर्त्रे । शुचये । वाग्मिने । दृड-व्रताय । काल-नेमि-प्रमथनाय ॥ ९० ॥

nava-vyākṛti-piṇḍitāya । catur-bāhave । dīna-bandhave । mahātmane । bhakta-vatsalāya । sañjīvana-nagā-hartre । śucaye । vāgmine । dṛḍa-vratāya । kāla-nemi-pramathanāya ॥ 90 ॥

हरि-मर्कट-मर्कटाय । दान्ताय । शान्ताय । प्रसन्नात्मने । शत-कण्ठ-मदापहृते । योगिने । राम-कथा-लोलाय । सीतान्-वेषण-पण्डिताय । वज्र-दंष्ट्राय । वज्र-नखाय ॥ १०० ॥

hari-markaṭa-markaṭāya । dāntāya । śāntāya । prasannātmane । śata-kaṇṭha-madāpahrte । yogine । rāma-kathā-lolāya । sītān-veṣaṇa-paṇḍitāya । vajra-daṁṣṭrāya । vajra-nakhāya ॥ 100 ॥

रुद्र-वीर्य-समुद्भवाय । इन्द्रजित्प्रहितामोघ-ब्रह्मास्त्र-विनिवारकाय । पार्थ-ध्वजाग्र-संवासिने । शर-पञ्जर-भेदकाय । दश-बाहवे । लोक-पूज्याय । जाम्बवत्-प्रिति-वर्धनाय । सीता-समेत-श्री-राम-पाद-सेवा-धुरन्धराय ॥ १०८ ॥

rudra-vīrya-samudbhavāya । indrajit-prahitā-mogha-brahmāstra-vinivārakāya । pārtha-dhvajāgra-saṁvāsine । śara-pañjara-bhedakāya । daśa-bāhave । loka-pūjyāya । jāmbavat-priti-vardhanāya । sītā-sameta-śrī-rāma-pāda-sevā-dhurandharāya ॥ 108 ॥

धूपार्थं, दीपार्थम् अक्षतान् समर्पयामि । श्री आञ्जनेयाय नमः — एतत् सर्वम् निवेदयामि । ताम्बूलं समर्पयामि ॥

dhūpārthaṁ, dīpārtham akṣatān samarpayāmi । śrī āñjaneyāya namaḥ — etat sarvam nivedayāmi । tāmbūlaṁ samarpayāmi ॥

hārati

नीराजनं सुमाङ्गल्यं कोटि-सूर्य समप्रभम् । अहं भक्त्या प्रदास्यामि स्वीकुरुष्व दया-निधे ॥
nīrājanaṁ sumāṅgalyaṁ koṭi-sūrya samaprabham ।
ahaṁ bhaktyā pradāsyāmi svīkuruṣva dayā-nidhe ॥

ॐ श्री आञ्जनेयाय नमः समस्तापराध क्षमार्थं सर्व मङ्गल प्राप्त्यर्थं कर्पूर नीराजने दर्शयामि ॥ रक्षां धारयामि । मन्त्र-पुष्पं समर्पयामि ।

oṁ śrī āñjaneyāya namaḥ samastāparādha kṣamārthaṁ sarva maṅgala prāptyarthaṁ karpūra nīrājane darśayāmi ॥ rakṣāṁ dhārayāmi । mantra-puṣpaṁ samarpayāmi ।

namaskāram

महाशैलं समुत्पाद्य धावन्तं रावणं प्रति । तिष्ठ तिष्ठ रणे दुष्ट घोर रावं समुत्सृजन ।
mahāśailaṁ samutpādya dhāvantaṁ rāvaṇaṁ prati ।
tiṣṭha tiṣṭha raṇe duṣṭa ghora rāvaṁ samut-sṛjana ।
Having raised the great mountain and charging towards the fierce Ravana, stand firm, stand firm in the battle, abandon the wicked and dreadful Ravana.

लाक्षार सारुणं रौद्रं कालान्तक यमोपमम् ॥ ज्वलदग्नि लसन् नेत्रं सूर्य कोटि सम-प्रभम् ।
lākṣāra sāruṇaṁ raudraṁ kālāntaka yamopamam ॥
jvalad agni lasan netraṁ sūrya koṭi sama-prabham ।
He is the essence of righteousness, formidable, fierce, resembling Yama (the god of death) at the end of time.

अङ्गदाद्यैर्महावीरैर्वेष्टितं रुद्र-रूपिणम् ॥ वज्र-देहाय कालाग्नि रुद्रायामित तेजसे ।
aṅgadādyair mahāvīrair veṣṭitaṁ rudra-rūpiṇam ॥
vajra-dehāya kālāgni rudrāyāmita tejase ।
With blazing eyes like the flames of fire, radiating brightness equivalent to millions of suns, enveloped by great and heroic beings like Angada, appearing in the form of Rudra (Shiva).
With a body like a thunderbolt and radiant like the fire of time, I bow to that Rudra whose brilliance is like the fire of death (Kalaagni).

ब्रह्मास्त्र स्तंभना यास्मै नमस्ते रुद्र मूर्तये ॥ मर्कटेश महोत्साह सर्व-शोक विनाशक ।
शत्रून् संहर मां रक्ष श्रीयं दासाय देहि मे ॥

brahmāstra staṁbhanā yāsmai namaste rudra mūrtaye ॥
markaṭeśa mahotsāha sarva-śoka vināśaka ।
śatrūn saṁhara māṁ rakṣa śrīyaṁ dāsāya dehi me ॥

Salutations to the form of Rudra, who possesses the Brahmastra (a powerful weapon) and can paralyze his enemies. O Markatesha (another name for Hanuman), the mighty and enthusiastic one, destroyer of all sorrows, annihilate my enemies, protect me, and grant me prosperity, O gracious one.

Prārthana

मनोजवं मारुत तुल्य-वेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानर यूथ मुख्यं श्रीराम-दूतं शिरसा नमामि ॥

manojavaṁ māruta tulya-vegaṁ jitendriyaṁ buddhimatāṁ variṣṭham ।
vātātmajaṁ vānara yūtha mukhyaṁ śrīrāma-dūtaṁ śirasā namāmi ॥

I bow down to the swift-footed, equal to the wind in speed, the conqueror of the senses, the most intelligent among the wise, the son of the wind and the chief of the monkey army, the messenger of Lord Rama, Sri Hanuman.

उल्लङ्घ्यः सिन्धोः सलिलं सलीलं यः शोक-वह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिर्-आञ्जनेयम् ॥

ullaṅghyaḥ sindhoḥ salilaṁ salīlaṁ yaḥ śoka-vahniṁ janakātmajāyāḥ ।
ādāya tenaiva dadāha laṅkāṁ namāmi taṁ prāñjalir-āñjaneyam ॥

I bow down with folded hands to that Anjaneya (Hanuman), who crossed the ocean simply by jumping, and extinguished the sorrowful fire in Janaka's daughter (Sita), and who burnt Lanka with the same fire.

अञ्जनेयम् अति-पाटलाननं काञ्चनाद्रि कमनीय विग्रहम् ।
पारिजात-तरु-मूलं वासिनं भावयामि पवमानन्दनम् ॥

añjaneyam ati-pāṭalānanaṁ kāñcanādri kamanīya vigraham ।
pārijāta-taru-mūlaṁ vāsinaṁ bhāvayāmi pavamānandanam ॥

I contemplate upon Anjaneya, with a radiant and charming golden complexion, whose face shines like a fully bloomed lotus, who resides at the base of the celestial Parijata tree, and who brings joy to the wind god (Vayu).

यत्र यत्र रघुनाथ कीर्तनं तत्र तत्र कृत-मस्तकाञ्जलिम् ।
वाष्पवारि-परिपूर्ण-लोचनं मारुतिं नमत राक्षसान्तकम् ॥

yatra yatra raghunātha kīrtanaṁ tatra tatra kṛta-mastakāñjalim ।
vāṣpavāri-paripūrṇa-locanaṁ mārutiṁ namata rākṣasāntakam ॥

Wherever the glory of Lord Raghunath (Rama) is sung, I bow down there with my head humbly held in my hands, paying homage to Hanuman, whose eyes are filled with tears, and who is the destroyer of demons.

श्री राम अर्पणम् अस्तु śrī rāma arpaṇam astu

APPENDICES

STOTRAS

JITANTE STOTRAM

जितन् ते पुण्डरीकाक्ष नमस्ते विश्व-भावन । नमस्ते ऽस्तु हृषीकेश महा-पुरुष पूर्वज ॥ १ ॥
jitan te puṇḍarīkākṣa namaste viśva-bhāvana |
namaste 'stu hṛṣīkeśa mahā-puruṣa pūrvaja || 1 ||

Victory to You O Lotus-eyed One, obeisance to the Universal object of meditation, Obeisance to You Master-of-the-senses, the Great Being that was first manifest.

नमस्ते वासुदेवाय शान्तानान्त चिद्-आत्मने ।अजिताय नमस्तुभ्यं षाड्गुण्या-निधये नमः ॥ २ ॥
namaste vāsudevāya śāntānānta cid-ātmane |
ajitāya namas-tubhyaṃ ṣāḍ-guṇyā-nidhaye namaḥ || 2 ||

Salutations to the All-pervading One, Peaceful, Eternal, the Form of Consciousness. O Invincible One salutations to You, the substratum of the six qualities.

महा-विभूति संस्थाय नमस्ते पुरुषोत्तम । सहस्र-शीरसे नित्यं सहस्र-चरणाय ते ॥ ३ ॥
mahā-vibhūti saṃsthāya namaste puruṣottama |
sahasra-śīrase nityaṃ sahasra-caraṇāya te || 3 ||

O source of the Great Energy, the Best Person, to You salutations. To You of a Thousand-heads and a thousand feet, eternal homage be.

सहस्र-बाहवे तुभ्यं सहस्र-नयनाय ते । अमृताय नमस्-तुभ्यं एक मूर्तये ते नमः ॥ ४ ॥
sahasra-bāhave tubhyaṃ sahasra-nayanāya te |
amṛtāya namas-tubhyaṃ eka mūrtaye te namaḥ || 4 ||

To You of countless arms, to You of countless eyes, To You who are immortal, to You who are One only, salutations be.

अनेक मूर्तये तुभ्यं अक्षराय च ते नमः । व्यापिने वेद-वेद्याय नमस्ते परमात्मने ॥ ५ ॥
aneka mūrtaye tubhyaṃ akṣarāya ca te namaḥ |
vyāpine veda-vedyāya namaste paramātmane || 5 ||

Salutations to You of innumerable forms, who are imperishable, All-pervading the source of revelation, salutations to the Supreme Soul.

चिन्मात्र रूपिणे तुभ्यं नमस्ते मन्त्र-मूर्तये । अणिष्ठाय स्थविष्ठाय महिष्ठाय च ते नमः ॥ ६ ॥
cin-mātra rūpiṇe tubhyaṃ namaste mantra-mūrtaye |
aṇiṣṭhāya sthaviṣṭhāya mahiṣṭhāya ca te namaḥ || 6 ||

Homage to You who are the form of Pure Consciousness, and manifest in the mantra. Salutations to You of Minute Form, of Expansive Form, and of Mighty Form.

नेदिष्ठाय दविष्ठाय क्षेपिष्ठाय नमो नमः । वर्षिष्ठाय यविष्ठाय कनिष्ठाय नमो नमः ॥ ७ ॥
nediṣṭhāya daviṣṭhāya kṣepiṣṭhāya namo namaḥ |
varṣiṣṭhāya yaviṣṭhāya kaniṣṭhāya namo namaḥ || 7 ||

To You who are the closest, the Farthest, Swiftest salutations again & again. To You who are the best, the Smallest, the Youngest, salutations again & again.

पञ्चात्मने नमस्-तुभ्यं सर्वान्तर्यामिणे नमः । कल्पना-क्रोड-रूपाय सृष्टि-स्थित्यन्त हेतवे ॥ ८ ॥
pañcātmane namas-tubhyaṃ sarvāntaryāmiṇe namaḥ |
kalpanā-kroḍa-rūpāya sṛṣṭi-sthityanta hetave || 8 ||

Homage to You who manifests in five forms, who is the Indweller of all beings. Manifest as a Boar in the beginning of time, the Cause of creation, preservation and dissolution.

नमस्ते गुण-रूपाय गुण-रूपाति वर्तिने । आदि-मध्यान्त शून्याय तत्त्व-देवा नमो नमः ॥ ९ ॥
namaste guṇa-rūpāya guṇa-rūpāti vartine ।
ādi-madhyānta śūnyāya tattva-devā namo namaḥ ॥ 9 ॥

Salutations to You who are the form of the Gunas, and the force behind them, to You who are the First, the Middle and the Last, the Void and the Lord of the elements.

प्रणव प्रतिपाद्याय नमः प्रणव-रूपिणे । व्यस्ताय च समस्ताय समस्त व्यस्त-रूपिणे ॥ १० ॥
praṇava pratipādyāya namaḥ praṇava-rūpiṇe ।
vyastāya ca samastāya samasta vyasta-rūpiṇe ॥ 10 ॥

You are the source of the primordial sonar vibration, salutations to You as such. You are the parts as well as the whole, Your forms are all the divisions.

लोक-यात्रा प्रसिद्ध्यर्थं सृष्ट ब्रह्मादि रूपिणे । नमस्तुभ्यं नृसिंहादि मूर्ति-भेदाय विष्णवे ॥ ११ ॥
loka-yātrā prasiddhyarthaṃ sṛṣṭa brahmādi rūpiṇe ।
namas-tubhyaṃ nṛsiṃhādi mūrti-bhedāya viṣṇave ॥ 11 ॥

In order to create the universe You manifested Yourself as Brahma and the others. Salutations to You O Vishnu who took the form of Narasimha and others.

विपाकैः कर्मभिः क्लेशैर् अस्पृष्ट वपुषे नमः । नमो ब्रह्मण्य-रूपाय तेजसां निधये नमः ॥ १२ ॥
vipākaiḥ karmabhiḥ kleśair aspṛṣṭa vapuṣe namaḥ ।
namo brahmaṇya-rūpāya tejasāṃ nidhaye namaḥ ॥ 12 ॥

Salutations to You who are not affected by the sorrowfull results of actions, Obeisance to the Lord of the Brahmins, to the Source of all Glory salutations.

नित्य साधारणानेक लोक रक्षापरिच्छदा । सच्चिद्-आनन्द-रूपाय वरेण्याय नमो नमः ॥ १३ ॥
nitya sādhāraṇāneka loka rakṣāpariccha dā ।
sac-cid-ānanda-rūpāya vareṇyāya namo namaḥ ॥ 13 ॥

You are the eternal determined protector of the innumerable galaxies. Obeisance to You the most Venerable, having the form of Truth, Consciousness & Bliss absolute.

यजमानाय यज्ञाय यष्टव्याय नमो नमः । इज्या-फलात्मने तुभ्यं नमः स्वार्थाय शालिने ॥ १४ ॥
yajamānāya yajñāya yaṣṭavyāya namo namaḥ ।
ijyā-phalātmane tubhyaṃ namaḥ svārthāya śāline ॥ 14 ॥

Obeisance again & again to the Initiator of sacrifice, to Sacrifice itself and to the Objects of Sacrifice, You are the Fruit of Sacrifice, salutations to You who are Your own determiner.

नमः परम-हंसाय नमः सत्त्व-गुणाय ते । स्थिताय परम व्योम्नि भूयो भूयो नमो नमः ॥ १५ ॥
namaḥ parama-haṃsāya namaḥ sattva-guṇāya te ।
sthitāya parama vyomni bhūyo bhūyo namo namaḥ ॥ 15 ॥

Salutations to the Supreme Swan, obeisance to You who are the embodiment of Goodness, Salutations again and again to You who are situated in the Transcendental Realm.

नमस्ते निस्तरङ्गाय नमस्ते सर्व-साक्षिणे । संसार सागरोत्तार कारणाय च ते नमः ॥ १६ ॥
namaste nistaraṅgāya namaste sarva-sākṣiṇe ।
saṃsāra sāgarottāra kāraṇāya ca te namaḥ ॥ 16 ॥

Salutations to the Redeemer, obeisance to the Universal Witness Salutations to You who are the Saviour from the ocean of rebirth.

सर्व लोक शरण्याय लक्ष्मीशाय च ते नमः । नियन्त्रे शेषिणे तुभ्यं नमस्ते मन्त्र मूर्तये ॥ १७ ॥
sarva loka śaraṇyāya lakṣmīśāya ca te namaḥ ।
niyantre śeṣiṇe tubhyaṃ namaste mantra mūrtaye ॥ 17 ॥

Salutations to You O Lord of Lakshmi, the suitable refuge of the entire universe, To You, O Controller and Substantive salutations, obeisance to the externalization of Sonic Vibration.

संसार सागरे घोरे विषया वर्त-सङ्ग्कुले । अपारे दुस्तरे ऽगाधे पतितं कर्मभिः स्वकैः ॥ १८ ॥
saṃsāra sāgare ghore viṣayā varta-saṅgkule ।
apāre dustare 'gādhe patitaṃ karmabhiḥ svakaiḥ ॥ 18 ॥

We have fallen by the results of our own actions, being confused by material involvements, into into this awful ocean of transmigration, which is deep, shoreless, unfathomable, hard to cross.

अनाथम् अगतिं भीरुं दयया परया हरे । माम् उद्धर दयासिन्धो सिन्धोरस्मात् सुदुस्तरात् ॥ १९ ॥
anātham agatiṃ bhīruṃ dayayā parayā hare ।
māṃ uddhara dayā-sindho sindhor asmāt sudustarāt ॥ 19 ॥

O Lord save me, out of compassion, from this dreadful ocean, hard to transcend, which I greatly fear. I am helpless and have no other refuge but You who are an Ocean of Compassion.

मन्त्र हानिं क्रिया हानिं हानिं वा ऽन्यां त्वदर्चने । क्षमस्व मम देव त्वं अपराध सहो ह्यसि ॥ २० ॥
mantra hāniṃ kriyā hāniṃ hāniṃ vā 'nyāṃ tvad arcane ।
kṣamasva mama deva tvaṃ aparādha saho hyasi ॥ 20 ॥

I am devoid of knowledge of the sacred formulae, of ritual methadology, & devoid of means to worship You. Forgive my dereliction O my Lord! Have patience with me!

भूमौ स्खलित पादानां भूमिर् एवावलम्बनम् । त्वयि जातापराधानां त्वम् एव शरणं मम ॥ २१ ॥
bhūmau skhalita pādānāṃ bhūmir evāvalambanam ।
tvayi jātāparādhānāṃ tvam eva śaraṇaṃ mama ॥ 21 ॥

I have fallen into materialism and taken it as my support, I have neglected my duty to You, who alone are my Refuge.

सो ऽहन्ते देव देवेश नार्चनादौ स्तुतेन च । सामर्थ्यवान् कृपा मात्रम् अनोवृत्ति प्रसीद मे ॥ २२ ॥
so 'hante deva deveśa nārcanādau stutena ca ।
sāmarthyavān kṛpā mātram anovṛtti prasīda me ॥ 22 ॥

I have not worshipped You or hymned Your praises, You have the capacity and the disposition to forgive me.

अपचारापदेशेन कृतान् अहरहर् मया । अपचारानिमान् सर्वान् क्षमस्व पुरुषोत्तम ॥ २३ ॥
apacārāpadeśena kṛtān aharahar mayā ।
apacārānimān sarvān kṣamasva puruṣottama ॥ 23 ॥

The misdeeds which I have done daily on various pretexts,I beg You to forgive them all, O Supreme Person.

ज्ञानतोऽज्ञानतो वाऽपि यथोक्तं न कृतं मया । तत्सर्वं पूर्णम् एवास्तु सुतृप्तो भव सर्वदा ॥ २४ ॥
jñānato 'jñānato vā'pi yathoktaṃ na kṛtaṃ mayā ।
tat sarvaṃ pūrṇam evāstu su-tṛpto bhava sarvadā ॥ 24 ॥

Whatever I may have done knowingly or unknowingly, or actions not done which I promised to do, may all that be fulfilled by You, and may You be satisfied thereby.

ॐ अच्युत जगन्नाथ मन्त्र-मूर्ते जनार्दन । रक्ष मां पुण्डरीकाक्ष क्षमस्वाज प्रसीद ॐ ॥ २५ ॥
oṁ acyuta jagan-nātha mantra-mūrte janārdana ।
rakṣa māṃ puṇḍarīkākṣa kṣamasvāja prasīda oṁ ॥ 25 ॥

O Inviolable Lord of the Universe, the Externalization of Sonic Vibration, Lord of Beings, Save me. O Lotus-eyed Lord! Forgive me! Have compassion upon me!

VIṢṆU STOTRAM

(Viṣṇu Purāṇa 1:9:39–56)

नमामि सर्वं सर्वेशम् अनन्तम् अजम् अव्ययम् । लोक धाम धराधारम् अप्रकाशम् अभेदिनम् ॥ १ ॥
namāmi sarvaṃ sarveśam anantam ajam avyayam ।
loka dhāma dharādhāram aprakāśam abhedinam ॥ 1 ॥

"We glorify him who is all things; the lord supreme over all; unborn, imperishable; the protector of the mighty ones of creation; the unperceived,

नारायणम् अणीयांसम् अशेषणाम् अणीयसाम् । समस्तानां गरिष्ठं च भूतादीनां गरीयसाम् ॥ २ ॥
nārāyaṇam aṇīyāṃsam aśeṣaṇām aṇīyasām ।
samastānāṃ gariṣṭhaṃ ca bhūtādīnāṃ garīyasām ॥ 2 ॥

Indivisible is Nārāyaṇa; the smallest of the smallest, the largest of the largest of all the elements;

यत्र सर्वं यतः सर्वम् उत्पन्नं मत् पुरः-सरम् । सर्व भूतश् च यो देवः पराणाम् अपि यः परः ॥ ३ ॥
yatra sarvaṃ yataḥ sarvam utpannaṃ mat puraḥ-saram ।
sarva bhūtaś ca yo devaḥ parāṇām api yaḥ paraḥ ॥ 3 ॥

In whom are all things, from whom all things arise; who was there before existence; the god who is all beings;

परः परस्मात् पुरुषात् परमात्म स्वरूप-धृक् । योगिभिश्-चिन्त्यते यो ऽसौ मुक्ति हेतोर् मुमुक्षुभिः ॥ ४ ॥
paraḥ parasmāt puruṣāt paramātma svarūpa-dhṛk ।
yogibhiś-cintyate yo 'sau mukti hetor mumukṣubhiḥ ॥ 4 ॥

He who is the end of ultimate objects; who is beyond all and is identified with the Cosmic consciousness; who is contemplated as the cause of final liberation by Yogis anxious to be free.

सत्तादयो न सन्तीशे यत्र च प्राकृता गुणाः । स शुद्धः सर्व शुद्धेभ्यः पुमान् आद्यः प्रसीदतु ॥ ५ ॥
sattādayo na santīśe yatra ca prākṛtā guṇāḥ ।
sa śuddhaḥ sarva śuddhebhyaḥ pumān ādyaḥ prasīdatu ॥ 5 ॥

He is beyond all the three guṇas that belong to undeveloped nature. May that purest of all pure spirits this day be bestow his compassion on us.

कला काष्ठा निमेषादि काल सूत्रस्य गोचरे । यस्य शक्तिर् न शुद्धस्य प्रसीदत् स नो हरिः ॥ ६ ॥
kalā kāṣṭhā nimeṣādi kāla sūtrasya gocare ।
yasya śaktir na śuddhasya prasīdat sa no hariḥ ॥ 6 ॥

May that Hari be propitious to us, whose inherent might is not an object of the progressive chain of moments or of days that make up time.

प्रोच्यते परमेशो हि यः शुद्धो ऽप्युपचारतः । प्रसीदतु स नो विष्णुरात्मा यः सर्व देहिनाम् ॥ ७ ॥
procyate parameśo hi yaḥ śuddho 'pyupacārataḥ ।
prasīdatu sa no viṣṇurātmā yaḥ sarva dehināṃ ॥ 7 ॥

May he who is called the supreme God Vishnu, who is not in need of any assistance, Hari, the over-self of all embodied substance, be favourable unto us.

यः कारणं च कार्यश् च कारणस्यापि कारणम् । कार्य स्यापि च यः कार्यं प्रसीदतु स नो हरिः ॥ ८ ॥
yaḥ kāraṇaṃ ca kāryaś ca kāraṇasyāpi kāraṇam ।
kārya syāpi ca yaḥ kāryaṃ prasīdatu sa no hariḥ ॥ 8 ॥

May that Hari, who is both cause and effect; who is the cause of cause, the effect of effect; he who is the effect of successive effect;

कार्य कार्यस्य यत् कार्यं तत् कार्यस्यापि यः स्वयम् । तत् कार्य कार्यभूतो यस्ततश्च प्रणता स्म तम् ॥ ९ ॥
kārya kāryasya yat kāryaṃ tat kāryasyāpi yaḥ svayam ।
tat kārya kāryabhūto yas tataś ca praṇatā sma tam ॥ 9 ॥

He who is the effect of the effect of the effect himself; the product of the effect of the effect of the effect, or elemental substance; to him I bow.

कारणं कारणस्यापि तस्य कारण-कारणम् । तत् कारणानां हेतुं त्वां प्रणता स्म सुरेश्वरम् ॥ १० ॥
kāraṇaṃ kāraṇasyāpi tasya kāraṇa-kāraṇam ।
tat kāraṇānāṃ hetuṃ tvāṃ praṇatā sma sureśvaram ॥ 10 ॥

The cause of the cause; the cause of the cause of the cause; the cause of them all; to him the God of all gods I bow.

भोक्तारं भोज्य भूतं च स्रष्टारं सृज्यम् एव च । कार्य कर्म स्वरूपं तं प्रणता स्म परं पदम् ॥ ११ ॥
bhoktāraṃ bhojya bhūtaṃ ca sraṣṭāraṃ sṛjyam eva ca ।
kārya karma svarūpaṃ taṃ praṇatā sma paraṃ padam ॥ 11 ॥

To him who is the enjoyer and thing to be enjoyed; the creator and thing to be created; who is the agent and the effect; to that Supreme Being I bow.

विशुद्धं बोधनं नित्यम् अजम् अक्षयम् अव्ययम् । अव्यक्तम् अविकारं यत् तद् विष्णोः परमं पदम् ॥ १२ ॥
viśuddhaṁ bodhanaṁ nityam ajam akṣayam avyayam ।
avyaktam avikāraṃ yat tad viṣṇoḥ paramaṃ padam ॥ 12 ॥

That is the highest state of Viṣṇu which is pure, intelligent, perpetual, unborn, undecayable, inexhaustible, inscrutable, immutable;

न स्थुलं न च सूक्ष्मं यन्न विशेषण गोचरम् । तत् पदं परमं विष्णोः प्रणमाम सदामलम् ॥ १३ ॥
na sthulaṃ na ca sūkṣmaṃ yanna viśeṣaṇa gocaram ।
tat padaṃ paramaṃ viṣṇoḥ praṇamāma sadāmalam ॥ 13 ॥

It is neither gross nor subtle, nor capable of being defined devoid of all particularities: to that ever immaculate state of Viṣṇu I bow.

यस्या युतायुतांशांशे विश्व शक्तिर् इयं स्थिता । पर-ब्रह्म स्वरूपं यत् प्रणमामस् तम् अव्ययम् ॥ १४ ॥
yasyā yutāyutāṁśāṁśe viśva śaktir iyaṃ sthitā ।
para-brahma svarūpaṃ yat praṇamāmas tam avyayam ॥ 14 ॥

To him whose faculty to create the universe abides in but a tiny part of the ten-millionth part of him; to him who is one with the inexhaustible Supreme Being, I bow.

यन्न देवा न मुनयो न चाहं न च शङ्करः । जानन्ति परमेश स्य तद् विष्णोः परमं पदम् ॥ १५ ॥
yanna devā na munayo na cāhaṃ na ca śaṅkaraḥ ।
jānanti parameśa sya tad viṣṇoḥ paramaṃ padam ॥ 15 ॥

and to the glorious nature of the supreme Viṣṇu, which nor gods, nor sages, nor I, nor Śankara apprehend;

यद् योगिनः सदोद्युक्ताः पुण्य पाप क्षये क्षयम् । पश्यन्ति प्रणवे चिन्त्यं तद् विष्णोः परमं पदम् ॥ १६ ॥
yad yoginaḥ sadodyuktāḥ puṇya pāpa kṣaye kṣayam ।
paśyanti praṇave cintyaṃ tad viṣṇoḥ paramaṃ padam ॥ 16 ॥

that nature which the Yogis, after incessant effort, effacing both moral merit and demerit, behold to be contemplated in the mystical monosyllable Om:

शक्तयो यस्य देवस्य ब्रह्म विष्णु शिवात्मिकाः । भवन्त्य् अभूत पूर्वस्य तद् विष्णोः परमं पदम् ॥ १७ ॥
śaktayo yasya devasya brahma viṣṇu śivātmikāḥ ।
bhavanty abhūta pūrvasya tad viṣṇoḥ paramaṃ padam ॥ 17 ॥

the supreme glory of Viṣṇu, who is the first of all; of whom, one only god, the triple energy is the same with Brahmā, Viṣṇu, and Śiva:

सर्वेश सर्व भूतात्मन् सर्व सर्वाश्रयाच्युत । प्रसीद विष्णो भक्तानां व्रज नो दृष्टि गोचरम् ॥ १८ ॥
sarveśa sarva bhūtātman sarva sarvāśrayācyuta ।
prasīda viṣṇo bhaktānāṃ vraja no dṛṣṭi gocaram ॥ 18 ॥

O lord of all, great soul of all, refuge of all, undecayable, have pity upon your servants; O Viṣṇu, be manifest unto us."

SVASTI-VĀCANAM

(sanatkumāre ṛṣirātre 6;40-49)

स्वस्तयेऽस्तु सदाविष्णुः स्वस्तयेऽस्तु चतुर्मुखः। स्वस्तयेऽस्तु सदा वह्निः स्वस्तयेऽस्तु यमस् सदा ॥१॥
svastaye'stu sadāviṣṇuḥ svastaye'stu caturmukhaḥ।
svastaye'stu sadā vahniḥ svastaye'stu yamas sadā॥ 1॥

May Vishnu always be auspicious to us. May the four-faced Brahma be auspicious. May Agni (fire) always be auspicious. May Yama always be auspicious.

स्वस्तयेऽस्तु निऋर्त्याख्यः स्वस्तये वरुणोऽस्तु नः। स्वस्तयेऽस्तु सदा वायुः स्वस्तयेऽस्तु धनेश्वरः ॥२॥
svastaye'stu niṛrtyākhyaḥ svastaye varuṇo'stu naḥ।
svastaye'stu sadā vāyuḥ svastaye'stu dhaneśvaraḥ॥ 2॥

May Nirriti be auspicious. May Varuna be auspicious to us. May Vayu (wind) always be auspicious. May Kubera (lord of wealth) be auspicious.

स्वस्तयेऽस्तु सदेशानः स्वस्तयेऽस्तु मरुद्-गणः । स्वस्तये संतु वसवो रुद्राश्च स्वस्तये तथा ॥ ३ ॥
svastaye'stu sadeśānaḥ svastaye'stu marud-gaṇaḥ।
svastaye santu vasavo rudrāśca svastaye tathā॥ 3॥

May Ishana always be auspicious. May the group of Maruts be auspicious. May the Vasus be auspicious, and likewise the Rudras be auspicious.

आदित्यास्स्वस्तये संतु मुनयस्-स्वस्तये तथा । गंधर्वास्स्वस्तये संतु स्वस्तये संतु किंनरः ॥ ४ ॥
ādityās svastaye santu munayas-svastaye tathā।
gandharvās svastaye santu svastaye santu kiṁnaraḥ॥ 4॥

May the Adityas be auspicious, and likewise the sages. May the Gandharvas be auspicious, and may the Kinnaras be auspicious.

स्वस्तये संतु नागाश्च स्वस्तये संतु पन्नगाः । स्वस्तये संतु विश्वेशाः स्वस्तयेऽप्सरसस् सदा ॥ ५ ॥
svastaye santu nāgāśca svastaye santu pannagāḥ।
svastaye santu viśveśāḥ svastaye'psarasas sadā॥ 5॥

May the Nagas be auspicious, and may the Pannagas (serpents) be auspicious. May the Vishvedevas be auspicious, and may the Apsaras always be auspicious.

स्वस्तये संतु नद्यश्च स्वस्तये संतु सागराः । स्वस्तये संतु शैलश्च वेदाश्च स्वस्तये तथा ॥ ६ ॥
svastaye santu nadyaśca svastaye santu sāgarāḥ।
svastaye santu śailaśca vedāśca svastaye tathā॥ 6॥

May the rivers be auspicious, and may the oceans be auspicious. May the mountains be auspicious, and likewise may the Vedas be auspicious.

स्वस्तये मातरस् संतु पितरस् स्वस्तये तथा । देव-पारिषदास् सर्वे स्वस्तये संतु नस्सदा ॥ ७ ॥
svastaye mātaras santu pitaras svastaye tathā।
deva-pāriṣadās sarve svastaye santu nas- sadā॥ 7॥

May the mothers be auspicious, and likewise the fathers. May all the attendants of the gods always be auspicious to us.

स्वस्ति भागवतानाम्तु स्वस्ति चाप्यग्र-जन्मनाम् । स्वस्ति वैष्णवानां तु स्वस्ति चैव गवामपि ॥ ८ ॥
svasti bhāgavatānām tu svasti cāpyagra-janmanām।
svasti vaiṣṇavānāṁ tu svasti caiva gavāmapi॥ 8॥

May there be auspiciousness for the devotees of Vishnu, and auspiciousness for the twice-born. May there be auspiciousness for the Vaishnavas, and also for the cows.

स्वस्ति वै स्थावराणां तु जंगमानां तथैव च । स्वस्ति चैवाथ मंत्राणां स्वस्ति वै कर्मणाम् अपि ॥ ९ ॥
svasti vai sthāvarāṇāṁ tu jaṅgamānāṁ tathaiva ca।
svasti caivātha mantrāṇāṁ svasti vai karmaṇām api॥ 9॥

May there be auspiciousness for the immobile beings, and also for the mobile ones. And may there be auspiciousness for the mantras, and auspiciousness for the rituals.

MANGALA STOTRAM

(Viṣṇu Samhita)

जगन्-निर्माण संहार स्थित्यनुग्रह हेतवः । देवानां ईश्वरा देवां मङ्गलं प्रदिशन्तु नः ॥ १ ॥
jagan-nirmāṇa saṁhāra sthityanugraha hetavaḥ ।
devānāṁ īśvarā devāṁ maṅgalaṁ pradiśantu naḥ ॥ 1 ॥

They are the causes of the creation, destruction, existence and grace of the universe. May the the lord of the gods bestow upon us all auspiciousness.

विष्णुर् ब्रह्मा च रुद्रश्च प्रचण्डश्चण्ड एव च । गरुत्मान् ऋषभश्चैते मङ्गलं प्रदिशन्तु नः ॥ २ ॥
viṣṇur brahmā ca rudraśca pracaṇḍaścaṇḍa eva ca ।
garutmān ṛṣabhaścaite maṅgalaṁ pradiśantu naḥ ॥ 2 ॥

May Vishnu, Brahmā, Rudra, Pracaṇḍa and Caṇḍa. May Garuḍa and Ṛṣabha bestow all auspiciousness upon us.

इन्द्रश्चाग्नि यमश्चैव निऋर्तिर् वरुणस् तथा । वायुर् वैश्रवणेशानौ मङ्गलं प्रदिशन्तु नः ॥ ३ ॥
indraścāgni yamaścaiva nirṛtir varuṇas tathā ।
vāyur vaiśravaṇeśānau maṅgalaṁ pradiśantu naḥ ॥ 3 ॥

Indra, Agni, Yama, Nirṛti and Varuna. May the wind and the lord of Vaiśravā bestow all auspiciousness upon us.

वराह नरसिंहौ च राम श्रीधर वामनाः । हयास्य वासुदेवौ च मङ्गलं प्रदिशन्तु नः ॥ ४ ॥
varāha narasiṁhau ca rāma śrīdhara vāmanāḥ ।
hayāsya vāsudevau ca maṅgalaṁ pradiśantu naḥ ॥ 4 ॥

O Varaha, O Narasimha, O Rāma, Śrīdhara and the Vāmanas and May Lord Hayariva and Vāsudeva bestow all auspiciousness upon this horse.

पूरुश्च निऋर्तिश्चैव सिंहो नारायणाच्युतौ । अनिरुद्धो हरिः कृष्णो मङ्गलं प्रदिशन्तु नः ॥ ५ ॥
pūruśca nirṛtiścaiva siṁho nārāyaṇācyutau ।
aniruddho hariḥ kṛṣṇo maṅgalaṁ pradiśantu naḥ ॥ 5 ॥

May Pūru and Nirṛti Narasimha Nārāyaṇa and Acyuta. May Lord Hari, Lord Aniruddha and Lord Kṛṣṇa bestow upon us all auspiciousness.

अष्टोत्तर सहस्रं तु विष्णु-पार्षदाश्च ये । अनुपारिषदाश्चान्ये मङ्गलं प्रदिशन्तु नः ॥ ६ ॥
aṣṭottara sahasraṁ tu viṣṇu-pārṣadāśca ye ।
anupāriṣadāścānye maṅgalaṁ pradiśantu naḥ ॥ 6 ॥

There were 18,000 associates of Lord Viṣṇu. May the other councilors bestow upon us all auspiciousness.

भूर्लोक भुवर्लोकाद्याः सप्तलोकाः प्रकीर्तिताः । सागराश्च तथा सर्वे मङ्गलं प्रदिशन्तु नः ॥ ७
bhūrloka bhuvarlokādyāḥ sapta lokāḥ prakīrtitāḥ ।
sāgarāśca tathā sarve maṅgalaṁ pradiśantu naḥ ॥ 7 ॥

The seven worlds, beginning with Bhūrloka and Bhuvarloka, have been described. May all the oceans and the oceans bestow upon us auspiciousness.

तथा पाताल लोकाश्च रुद्रलोकास्सुखोषिताः । दिक्षु सर्वासु तिष्ठन्तो मङ्गलं प्रदिशन्तु नः ॥ ८
tathā pātāla lokāśca rudralokās sukhoṣitāḥ ।
dikṣu sarvāsu tiṣṭhanto maṅgalaṁ pradiśantu naḥ ॥ 8 ॥

Similarly, the worlds of the underworld and the worlds of Rudra are happily enjoyed. May those who are present in all directions bestow upon us auspiciousness.

गङ्गाच यमुना चैव तथा गोदा सरस्वती । नर्मदा चैव कावेरी मङ्गलं प्रदिशन्तु नः ॥ ९ ॥
gaṅgāca yamunā caiva tathā godā sarasvatī ।

narmadā caiva kāverī maṅgalaṁ pradiśantu naḥ ॥ 9 ॥

The Ganges, Yamuna, Goda and Sarasvatī are also mentioned. May the rivers Narmadā and Cauvery bestow upon us all auspiciousness.

सूर्यादयो ग्रहाश्चाथ मेषाद्याह राशयस्तथा । मासाश्चापि सविष्णवाद्या मङ्गलं प्रदिशन्तु नः ॥
sūryādayo grahāścātha meṣādyāha rāśayas tathā ।
māsāścāpi sa-viṣṇavādyā maṅgalaṁ pradiśantu naḥ ॥ 10 ॥

May the sun and other planets and the signs of the zodiac, such as Aries. May the months, along with the devotees of Lord Viṣṇu, bestow upon us all auspiciousness.

सर्वे विद्येश्वराश्चापि ये दिव्या ये च मानवाः । दिव्यन्तरिक्ष भूमिस्च मङ्गलं प्रदिशन्तु नः ॥ ११
sarve vidyeśvarāścāpi ye divyā ye ca mānavāḥ ।
divyantarikṣa bhūmis ca maṅgalaṁ pradiśantu naḥ ॥ 11 ॥

All the gods of knowledge, both divine and human. May the heavenly sky and the earth bestow upon us all auspiciousness.

अहिर्बुध्निः पिनाकी च भवनोऽथेश्वरस्तथा । स्थाणु भवच्च पापारि मङ्गलं प्रदिशन्तु नः ॥ १२
ahirbudhniḥ pināk ca bhavano'theśvaras tathā ।
sthāṇu bhavacca pāpāri maṅgalaṁ pradiśantu naḥ ॥ 12 ॥

The serpent, Budhni, Pinaki, Bhavana and Ishwara. May you, O eraser of sins, remain steadfast and bestow upon us all good fortune.

एवं मङ्गल वादात् तास्सिद्धिं यच्छन्ति देवताः । सर्व कर्म समारम्भे कर्तव्यं च सुमङ्गलम् ॥ १३
evaṁ maṅgala vādāt tās siddhiṁ yacchanti devatāḥ ।
sarva karma samārambhe kartavyaṁ ca sumaṅgalam ॥ 13 ॥

Thus, by the auspicious declaration, may the gods grant perfection. At the beginning of all activities one should perform auspicious rituals.

GARUḌA STOTRAM

वाहनाय महा-विष्णु ताक्षाय अमित तेजसे । गरुडाय नमस्तुभ्यं सर्व सर्वेन्द्र मृत्सवे ॥१॥
vāhanāya mahā-viṣṇu tārkṣāya amita tejase ।
garuḍāya namas-tubhyaṁ sarva sarvendra mṛtsave ॥ 1 ॥

O great Lord Viṣṇu, O carrier, O Tārkṣa, O immeasurably effulgent one, O Lord of all beings, I offer my respectful obeisances unto You, Garuḍa.

नमो नमस्ते पक्षिन्द्र स्वाध्याय वपुषे नमः । विहगेन्द्र नमस्ते ऽस्तु समुत्पातिक कल्पक ॥२॥
namo namaste pakṣindra svādhyāya vapuṣe namaḥ ।
vihagendra namaste 'stu samuttpātika kalpaka ॥ 2 ॥

O lord of birds, I offer my respectful obeisances unto You, whose body is the form of the Vedas. O lord of the birds, I offer my respectful obeisances unto you, who are the creator of the universe.

आहृतामृत कुम्भाय जननि दास्य योचते । सुरा सुरेन्द्र जयने नागेन्द्र आभरणाय ते ॥३॥
āhṛtāmṛta kumbhāya janani dāsya yocate ।
surā surendra jayane nāgendra ābharaṇāya te ॥ 3 ॥

"The Mother (Devi) is believed to offer the ambrosia-filled vessel (kumbha) to her servant. To conquer the gods through sura (divine nectar), you adorn yourself with Nagendra's (serpent king) ornaments.

यदाधारमिदं सर्वं तदा आधारं ते नमः । पक्षो यस्य बृहत्-साम रथन्तरमपि द्वयम् ॥४॥
yadādhāram idaṁ sarvaṁ tadā ādhāraṁ te namaḥ ।
pakṣo yasya bṛhat-sāma rathantaram api dvayam ॥ 4 ॥

When this entire universe finds its support, then my salutations to that support. Whose wings are the Brihatsama, and Rathantara hymns.

अक्षिणी चाऽपि गायत्री त्री बृहत्साम शिरस्कृतम् । सोमाऽत्म नमस्तस्मै वाम देव्यङ्ग सम्पदे ॥
akṣiṇī cā 'pi gāyatrī trī bṛhat-sāma śiras-kṛtam ।

somā 'tma namas tasmai vāma devyaṅga sampade ॥ 5 ॥

"The right eye is Gayatri, the threefold Bṛhatsam adorns the head. Salutations to Soma (moon), and to the left eye, which bestows divine wealth. "

नम प्राणादि वायुनाम् ईशाय गरुडात्मने । दोषान् नयन् आखण्डान् गुणाऋनव सर्वतः ।
विघ्नान् जहि सर्वाणि अस्मत् सात्कुरु मामपि ॥६॥

nama prāṇādi vāyunām īśāya garuḍātmane ।
doṣān nayan ākhaṇḍān guṇāṛnava sarvataḥ ।
vighnān jahi sarvāṇi asmat sātkuru mām api ॥ 6 ॥

I bow to the Lord who is the life force of all beings, who manifests as the wind and has Garuda as His soul. Destroying all faults and bestowing unending virtues everywhere, remove all obstacles and bless me with your grace."

GARUḌA GATI TALA

श्रीमद् गरुडं खचित किरीटाभरणं, पद्म नूपुर किङ्किनी घोषं, साम गायत पक्ष युग्मं, व्याहृति ऋक्षं, सकल युगल पतिं, सकल सृष्टि पतिं, शत्रु मर्दन्-आन्तकं, ब्रह्म भव वन्दितं, कनकाच लोचनं, पङ्कज पुञ्जाननं, तत् तच् चरन गतिर् अभष किङ्किणी जुझ्झटतो अशुर रव सकल विभव संहारं, संभव त्रिदिव गंइतं गंइतं आमृअता भरणं, अम्बा बन्ध विमोचनं, खग वाद्यं सकल लोक वैरि नाग वैरि ज्वाला ज्वालं, वाहन वैकुण्ठ नाथं, सकल भूत हृदय गेहं, तत् तत् सकल भूत हृदय गेहं तद् ईष शत-कृत्य सह बान कुल कोटिं ॥

śrīmad garuḍaṃ khacita kirīṭābharaṇaṃ, padma nūpura kiṅkinī ghoṣaṃ, sāma gāyata pakṣa yugmaṁ, vyāhṛti ṛkṣaṁ, sakala yugala patiṃ, sakala sṛṣṭi patiṃ, śatru mardan-āntakaṃ, brahma bhava vanditaṃ, kanakāca locanaṃ, paṅkaja puñjānanaṃ, tat tac carana gatir abhaṣa kiṅkiṇī jujhjhaṭato aśura rava sakala vibhava saṃhāraṃ, saṃbhava tridiva gaṃitaṃ gaṃitaṃ āmṛatā bharaṇaṃ, ambā bandha vimocanaṃ, khaga vādyaṃ sakala loka vairi nāga vairi jvālā jvālaṃ, vāhana vaikuṇṭha nāthaṃ, sakala bhūta hṛdaya gehaṃ, tat tat sakala bhūta hṛdaya gehaṃ tad īṣa śata-kṛtya saha bāna kula koṭiṃ ॥

I bow to Garuda, who: Wears a crown studded with gems. Has anklets and small bells that make melodious sounds. Has wings that sing the Sama Veda. Bears the Vyahritis (sacred utterances) as his constellations. Is the lord of all pairs and the master of all creation. Crushes enemies and brings about their end. Is worshipped by Brahma and Shiva. Has golden eyes and a lotus-like face. Moves with grace, his anklets jingling. Destroys the pride and power of demons with his terrifying roar. Brings nectar from the heavens. Frees his mother from bondage. Is the enemy of snakes, blazing like fire. Is the vehicle of Lord Vaikuntha (Vishnu). Resides in the hearts of all beings. Carries countless arrows to destroy evil.

मद मद्य कर पक्ष कर पाद युगलं, तत् तत् त्रिर् मद्दल ताल काहल सर्व वाद्य रवं विनता-नन्दं विनता-नन्दं ॥

mada madya kara pakṣa kara pāda yugalaṃ, tat tat trir maddala tāla kāhala sarva vādya ravaṃ vinatā-nandaṃ vinatā-nandaṃ ॥

I bow to Garuda, who: Has wings that create intoxicating sounds. Has feet that make rhythmic sounds. Is accompanied by the sounds of drums, cymbals, and all musical instruments.Brings joy to his mother Vinata.

इन्द्रादि-भिस्-सह कुमुदादि-भिस्-सह विश्व गुण वाहनं, तत् तत् विश्व गुण वाहनं । तत् तत् मृद गमन पक्ष रभषं, सुगन्धित पट्टू कपटुका सुर कुल निश्शेषं, झन झन महोत्तुङ्ग शाकिनी डाकिनी सहितं, सुहृदय झन झन जघृनि किङ्किणी हण हण विकृत कङ्कणं । भुजग कुल भूषनं, विहग विभीषनं, बृहत् पक्षं विपक्ष-घनं, हरि-वाहन हरि-केटनं, गरुट्मन्तं नमस्येऽहं नमस्येऽहं । अलिक लालित तनु सु-कोमल मलिन सदृष गतिं, भृउकुटि-भीषन नील नाशिक पिङ्गल लोचनं, कणक कल्पित खचित रत्न करण्ड मकुट धरं, विहग परिवृधं, अहि विभीषनं, अषुर वैरि-धरं तत् शद् अशुर वैरि धरं ॥

indrādi-bhis-saha kumudādi-bhis-saha viśva guṇa vāhanaṃ, tat tat viśva guṇa vāhanaṃ । tat tat mṛda gamana pakṣa rabhaṣaṃ, sugandhita paṭṭū kapaṭukā sura kula niśśeṣaṃ, jhana jhana mahottuṅga śākinī ḍākinī sahitaṃ, suhṛdaya jhana jhana jaghṛni kiṅkiṇī haṇa haṇa vikṛta

kaṅkaṇaṃ । bhujaga kula bhūṣanaṃ, vihaga vibhīṣanaṃ, bṛhat pakṣaṃ vipakṣa-ghanaṃ, hari-vāhana hari-keṭanaṃ, garuṭmantaṃ namasye'haṃ namasye'haṃ । alika lālita tanu su-komala malina sadṛṣa gatiṃ, bhṛukuṭi-bhīṣana nīla nāśika piṅgala locanaṃ, kaṇaka kalpita khacita ratna karaṇḍa makuṭa dharaṃ, vihaga parivṛdhaṃ, ahi vibhīṣanaṃ, aṣura vairi-dharaṃ tat śad aśura vairi dharaṃ ॥

Is the vehicle carrying universal qualities, accompanied by Indra and other gods. Moves gracefully with flapping wings. Is adorned with fragrant silk garments. Is accompanied by Shakinis and Dakinis (female supernatural beings). Wears jingling ornaments and bracelets. Is adorned with serpents. Is terrifying to birds. Has large wings that destroy enemies. Is the vehicle and banner of Hari (Vishnu). Has a body as delicate as a bee's wing but moves powerfully. Has a terrifying frown, blue beak, and reddish-brown eyes. Wears a crown studded with gems. Is surrounded by birds. Is feared by serpents. Is the enemy of demons

AṢṬHOTTARA ŚATA-NĀMAVALLI SAṄGRAHA

1. Śrī Viṣṇu aṣṭhottara śata-nāmavalliḥ

ॐ विष्णवे नमः । लक्ष्मी-पतये । गोपालाय । वैकुन्ठाय । गरुड-ध्वजाय । पर-ब्रह्मणे । जगन्-नाथाय । वासुदेवाय । त्रि-विक्रमाय । दैत्यांतकाय ॥ १० ॥
oṁ viṣṇave namaḥ । lakṣmī-pataye । gopālāya । vaikunṭhāya । garuḍa-dhvajāya । para-brahmaṇe । jagan-nāthāya । vāsudevāya । tri-vikramāya । daityāntakāya ॥ 10 ॥

मधु-रिपवे । ताक्ष्र्य-वाहाय । सनातनाय । नारायणाय । पद्म-नाभाय । हृषिकेशाय । सुधा-प्रदाय । माधवाय । पुंडरिकाक्षाय । स्थिति-कर्त्रे ॥ २० ॥
madhu-ripave । tārkṣya-vāhāya । sanātanāya । nārāyaṇāya । padma-nābhāya । hṛṣikeśāya । sudhā-pradāya । mādhavāya । puṇḍarikākṣāya । sthiti-kartre ॥ 20 ॥

परात्पराय । वनमालिने । यज्ञ-रूपाय । चक्र-पाणये । गदा-धराय । उपेंद्राय । केशवाय । हम्साय । समुद्र-मथनाय । हरये ॥ ३० ॥
parātparāya । vanamāline । yajña-rūpāya । cakra-pāṇaye । gadā-dharāya । upendrāya । keśavāya । hamsāya । samudra-mathanāya । haraye ॥ 30 ॥

गोविंदाय । ब्रह्म-जनकाय । कैटभासुर- मर्दनाय । श्रीधराय । काम-जनकाय । शेष-शायिने । चतुर्भुजाय । पांचजन्य-धराय । श्रीमते । शार्ङ्ग-पाणये ॥ ४० ॥
govindāya । brahma-janakāya । kaiṭabhāsura- mardanāya । śrīdharāya । kāma-janakāya । śeṣa-śāyine । catur-bhujāya । pāñcajanya-dharāya । śrīmate । śārṅga-pāṇaye ॥ 40 ॥

जनार्दनाय । पितांबर-धराय । देवाय । सूर्य-चंद्र-विलोचनाय । मत्स्य-रूपाय । कूर्म-रूपाय । क्रोढ-रूपाय । नृकेशरिनि । वामनाय । भार्गवाय ॥ ५० ॥
janārdanāya । pitāmbara-dharāya । devāya । sūrya-candra-vilocanāya । matsya-rūpāya । kūrma-rūpāya । kroḍha-rūpāya । nṛkeśarini । vāmanāya । bhārgavāya ॥ 50

रामाय । हलिने । कृष्णाय । हयाननाय । विश्वंबराय । सिंसुमाराय । श्रीधराय । कपिलाय । ध्रुवाय । दत्तात्रेयाय ॥ ६० ॥
rāmāya । haline । kṛṣṇāya । hayānanāya । viśvambarāya । simsumārāya । śrīdharāya । kapilāya । dhruvāya । dattātreyāya ॥ 60 ॥

अच्युताय । अनंताय । मुकुंदाय । दधि-वामनाय । धन्वंतरये । श्री-निवासाय । प्रद्युम्नाय । पुरुषोत्तमाय । श्रीवत्स-कौस्तुभोरस्काय । मुरारातये ॥ ७० ॥
acyutāya । anantāya । mukundāya । dadhi-vāmanāya । dhanvantaraye । śrī-nivāsāya । pradyumnāya । puruṣottamāya । śrīvatsa-kaustubhoraskāya । murārātāye ॥ 70 ॥

अधोक्षजाय । वृषभाय । मोहिनि-रूप-धारिणे । संकर्षणाय । पृथवे । क्षीराब्धि-शायिने । भूतात्मने । भगवते । भक्त-वत्सलाय । अनिरुद्धाय ॥ ८० ॥
adhokṣajāya । vṛṣabhāya । mohini-rūpa-dhāriṇe । saṅkarṣaṇāya । pṛthave । kṣīrābdhi-śāyine । bhūtātmane । bhagavate । bhakta-vatsalāya । aniruddhāya ॥ 80 ॥

अप्रमेयात्मने । त्रि-धाम्ने । भूत-भावनाय । श्वेत-द्वीपे-निवास्तव्याय । सूर्य-मंडल-मध्य -गाय । सनकादि-संसेविताय । गजेंद्र-वरदाय । नारायणाय । नील-कांताय । धरा-कांताय ॥ ९० ॥
aprameyātmane । tri-dhāmne । bhūta-bhāvanāya । śveta-dvīpe-nivāstavyāya । sūrya-maṇḍala-madhya -gāya । sanakādi-samsevitāya । gajendra-varadāya । nārāyaṇāya । nīla-kāntāya । dharā-kāntāya ॥ 90 ॥

वेदात्मने । बाद्रायनाय । भागिरथि-जन्म-भूमि-पाद-पद्माय । सताम्-प्रभवे । स्वभुवे । विभवे । गनश्यामाय । जगत्-कारणाय । अव्ययाय । बुद्धावताराय ॥ १०० ॥
vedātmane | bādrāyanāya | bhāgirathi-janma-bhūmi-pāda-padmāya | satām-prabhave | svabhuve | vibhave | ganaśyāmāya | jagat-kāraṇāya | avyayāya | buddhāvatārāya ॥100 ॥

शांतात्मने । लिलाधृत-वराकृतये । दमोदराय । विराट्-रूपाय । भूत-भवत्-प्रभवे । आदि-देवाय । देव-देवाय । प्रह्लाद-परिपालकाय ॥ १०८ ॥

śāntātmane | lilādhṛta-varākṛtaye | damodarāya | virāṭ-rūpāya | bhūta-bhavat-prabhave | ādi-devāya | deva-devāya | prahlāda-paripālakāya ॥ 108 ॥

2. Śrī Kṛṣṇa aṣṭhottara śata-nāmavalliḥ

ॐ श्री कृष्णाय नमः । कमल-नाथाय । वासुदेवाय । सनातनाय । वासुदेवात्मजाय । पुण्याय । लील-मानुष-विग्रहाय । श्रीवत्स-कौस्तुभ-धराय । यशोदा-वत्सलाय । हरये ॥ १० ॥

oṁ śrī kṛṣṇāya namaḥ | kamala-nāthāya | vāsudevāya | sanātanāya | vāsudevātmajāya | puṇyāya | līla-mānuṣa-vigrahāya | śrīvatsa-kaustubha-dharāya | yaśodā-vatsalāya | haraye ॥ 10

चतुर्-भुजात्त-चक्रासि-गदा-शङ्खाद्-युदा-युधाय । देवकी-नन्दनाय । श्रीशाय । नन्द-गोप-प्रियात्मजाय । यमुना-वेग-संहारिणे । बल-भद्र-प्रियानुजाय । पूतन-जीवित-हराय । शकटासुर-भञ्जनाय । नन्द-व्रज-जनानन्दिने । सच्चिद्-आनन्द-विग्रहाय ॥ २० ॥

catur-bhujātta-cakrāsi-gadā-śaṅkhād-yudā-yudhāya | devakī-nandanāya | śrīśāya | nanda-gopa-priyātmajāya | yamunā-vega-saṁhāriṇe | bala-bhadra-priyānujāya | pūtana-jīvita-harāya | śakaṭāsura-bhañjanāya | nanda-vraja-janānandine | saccid-ānanda-vigrahāya ॥ 20 ॥

नवनीत-विलिप्ताङ्गाय । नवनीत-नटाय । अनघाय । नवनीत-नवा-हाराय । मुचुकुन्द-प्रसादकाय । षोडश-स्त्री-सहस्रेशाय । त्रि-भङ्गिने । ललिताकृतये । शुक-वाग्-अमृताब्धीन्दवे । गोविन्दाय ॥ ३० ॥

navanīta-viliptāṅgāya | navanīta-naṭāya | anaghāya | navanīta-navā-hārāya | mucukunda-prasādakāya | ṣoḍaśa-strī-sahasreśāya | tri-bhaṅgine | lalitākṛtaye | śuka-vāg-amṛtābdhīndave | govindāya ॥ 30 ॥

योगिनाम्-पतये । वत्स-वाट-चराय । अनन्ताय । धेनुकासुर-मर्दनाय । तृणी-कृत-तृणावर्ताय । यमलार्जुन-भञ्जनाय । उत्ताल-ताल-भेत्रे । तमाल-श्यामल्-आकृतये । गोप-गोपीश्वराय । योगिने ॥ ४० ॥
yoginām-pataye | vatsa-vāṭa-carāya | anantāya | dhenukāsura-mardanāya | tṛṇī-kṛta-tṛṇāvartāya | yamalārjuna-bhañjanāya | uttāla-tāla-bhetre | tamāla-śyāmal-ākṛtaye | gopa-gopīśvarāya | yogine ॥ 40 ॥

कोटि-सूर्य-सम-प्रभाय । इलाआ-पतये । परस्मै-ज्योतिषे । यादवेन्द्राय । यदु-द्वहाय । वन-मालिने । पीत-वाससे । पारिजात-अपहारकाय । गोवर्धन-अचलोद्धर्त्रे । गोपालाय ॥ ५० ॥
koṭi-sūrya-sama-prabhāya | ilā-pataye | parasmai-jyotiṣe | yādavendrāya | yadu-dvahāya | vana-māline | pīta-vāsase | pārijāta-apahārakāya | govardhana-acaloddhartre | gopālāya ॥ 50 ॥

सर्व-पालकाय । अजाय निरञ्जनाय । काम-जनकाय । कञ्ज-लोचनाय । मधुघ्ने । मथुरा-नाथाय । द्वारका-नायकाय । बलिने । वृन्दावन्-आन्तर-सञ्चारिणे । तुलसी-दाम-भूषणाय ॥ ६० ॥

sarva-pālakāya | ajāya nirañjanāya | kāma-janakāya | kañja-locanāya | madhughne | mathurā-nāthāya | dvārakā-nāyakāya | baline | vṛndāvan-āntara-sañcāriṇe | tulasī-dāma-bhūṣaṇāya ॥ 60

स्यामन्तक-मणेर्-हर्त्रे । नर-नारायण-आत्मकाय । कुब्ज-आकृष्टाम्बर-धराय । मायिने । परम-पूरुषाय । मुष्टिकासुर-चाणूर-मल्लयुध्-विशारधाय । संसार-वैरिणे । कंसारये । मुरारये । नरकान्तकाय ॥ ७० ॥

syāmantaka-maṇer-hartre । nara-nārāyaṇa-ātmakāya । kubja-ākṛṣṭāmbara-dharāya । māyine । parama-pūruṣāya । muṣṭikāsura-cāṇūra-mallayudh-viśāradhāya । saṁsāra-vairiṇe । kaṁsāraye । murāraye । narakāntakāya ॥ 70 ॥

अनादि-ब्रह्म-चारिणे । कृष्णा-व्यशन-कर्शकाय । शिषुपाल-शिरस्-छेत्रे । दुर्योधन-कुलान्तकाय । विदुराक्रूर-वरदाय । विश्वरूप-प्रदर्शकाय । सत्य-सङ्कल्पाय । सत्य-वाचे । सत्यभामा-रतये । जयिने ॥ ८० ॥

anādi-brahma-cāriṇe । kṛṣṇā-vyaśana-karśakāya । śiṣupāla-śiras-chetre । duryodhana-kulāntakāya । vidurākrūra-varadāya । viśvarūpa-pradarśakāya । satya-saṅkalpāya । satya-vāce । satyabhāmā-rataye । jayine ॥ 80 ॥

सुभद्रा-पूर्वजाय । विष्णवे । भीष्म-मुक्ति-प्रदायकाय । जगद्-गुरवे । जगन्-नाथाय । वेणु-नाद-विशारदाय । वृषभासुर-विध्वंसिने । बाणासुर-करान्तकाय । युधिष्ठिर-प्रतिष्ठात्रे । बर्हि-बर्हावत्-अंसकय ॥ ९० ॥

subhadrā-pūrvajāya । viṣṇave । bhīṣma-mukti-pradāyakāya । jagad-gurave । jagan-nāthāya । veṇu-nāda-viśāradāya । vṛṣabhāsura-vidhvaṁsine । bāṇāsura-karāntakāya । yudhiṣṭhira-pratiṣṭhātre । barhi-barhāvat-aṁsakaya ॥ 90 ॥

पार्थ-सारथये । अव्यक्ताय । गीतामृत-महोदधये । कालइय-फणि-माणिक्य-रञ्जित-श्री-पदाम्बुजाय । दामोदराय । यज्ञ-भोक्त्रे । दानवेन्द्र-विनाशकाय । नारायणाय । पर-ब्रह्मणे । पन्नगाशन-वाहनाय ॥ १०० ॥

pārtha-sārathaye । avyaktāya । gītāmṛta-mahodadhaye । kāliya-phaṇi-māṇikya-rañjita-śrī-padāmbujāya । dāmodarāya । yajña-bhoktre । dānavendra-vināśakāya । nārāyaṇāya । para-brahmaṇe । pannagāśana-vāhanāya ॥ 100 ॥

जल-क्रीडा-समासक्त-गोपी-वस्त्रापहारकाय । पुण्य-श्लोकाय । तीर्थपादाय । वेद-वेद्याय । दया-निधये । सर्व-भूतात्मकाय । सर्व-ग्रह-रूपिणे । परात्पराय ॥ १०८ ॥

jala-krīḍā-samāsakta-gopī-vastrāpahārakāya । puṇya-ślokāya । tīrthapādāya । veda-vedyāya । dayā-nidhaye । sarva-bhūtātmakāya । sarva-graha-rūpiṇe । parātparāya ॥ 108 ॥

4. Sudarśana aṣṭhottara śata-nāmavalliḥ

ॐ श्री सुदर्शनाय नमः । चक्र-राजाय । तेजो-व्युहाय । महा-द्युताय । सहस्र-बाहवे । दीप्तांगाय । अरुणाक्षाय । प्रतापवते । अनेकादित्य-संकाशाय । प्रोर्ध्व-ज्वल-भिरंजिताय ॥ १० ॥

oṁ śrī sudarśanāya namaḥ । cakra-rājāya । tejo-vyuhāya । mahā-dyutāya । sahasrabahave । dīptāṅgāya । aruṇākṣāya । pratāpavate । anekāditya-saṁkāśāya । prordhva-jvala-bhirañjitāya ॥ 10

सौदामणि-सहस्राभाय । मणि-कुंडल-शोभिताय । पंच-भूत-मनो-रूपाय । षट्कोणंतर-संस्थिताय । हरांत-करणोद्भुत-रोष-भीषन-विग्रहाय । हरि-पाणि-लसत्-पद्म-विहार-रमणोहराय । श्रीकार-रूपाय । सर्व-ज्ञानाय । सर्व-लोक-अर्चित-प्रभवे । चतुर्दश-सहस्राराय ॥ २० ॥

saudāmaṇi-sahasrabhāya । maṇi-kuṇḍala-śobhitāya । pañca-bhūta-mano-rūpāya । ṣaṭkoṇantara-saṁsthitāya । harānta-karaṇodbhuta-roṣa-bhīṣana-vigrahāya । hari-pāṇi-lasat-padma-vihāra-ramaṇoharāya । srīkāra-rūpāya । sarva-jñānāya । sarva-loka-arcita-prabhave । catur-daśa-sahasrārāya ॥ 20 ॥

चतुर्-वेद-मयाय । अनलाय । भक्त-चंद्रमस-ज्योतिषे । भव-रोग-विनाशकाय । रेफात्मकाय । मकारात्मने । रक्षो-सृग्-भुषितांगकाय । सर्व-दैत्य-ग्रीवनाल-विभेदन-महा-गजाय । ज्वलकराय ॥ ३०

catur-veda-mayāya । analāya । bhakta-candramasa-jyotiṣe । bhava-roga-vināśakāya । rephātmakāya । makārātmane । rakṣo-sṛug-bhuṣitāṅgakāya । sarva-daitya-grīvanāḷa-vibhedana-mahā-gajāya । jvala-karāya ॥ 30 ॥

भीम-कर्मणे । त्रिलोचनाय । नील-वर्त्मने । नित्य-सुखाय । निर्मल-श्रीयै । निरंजनाय । रक्त-माल्यांबर-धराय । रक्त-चंदन-भूषिताय । रजो-गुण-कृते । शूराय ॥ ४० ॥

bhīma-karmaṇe । trilocanāya । nīla-vartmane । nitya-sukhāya । nirmala-śrīyai । nirañjanāya । rakta-mālyāmbaradharāya । rakta-candana-bhūṣitāya । rajo-guṇa-kṛte । śūrāya ॥ 40 ॥

राक्षस-कुल-मोहनाय । नित्य-क्षेम-कराय । प्रज्ञाय । पाषंड-जन-खंडनाय । नारायण-ज्ञानुवर्थिने । नैगमांत-प्रकाशकाय । बलि-मंदन-दोर्दंड-खंडनाय । विजयाकृतये । मित्र-भाविने । सर्व-मयाय ॥

rākṣasa-kula mohanāya । nitya-kṣema-karāya । prajñāya । pāṣaṇḍa-jana-khaṇḍanāya । nārāyaṇa-jñānuvarthine । naigamānta-prakāśakāya । bali-mandana-dordaṇḍa-khaṇḍanāya । vijayākṛtaye । mitra-bhāvine । sarva-mayāya ॥ 50 ॥

तमो-विध्वंशनाय । रजस्सत्त्व-तमोध्वर्तिने । त्रि-गुणात्मने । त्रिलोक-धृते । हरिमाय-गुणोपेथाय । अव्ययाय । अक्षर-रूप-भाजे । परमात्मने । परम-ज्योतिषे । पंच-कृत्य-परायणाय ॥ ६० ॥

tamo-vidhvaṁśanāya । rajas-sattva-tamodhvartine । tri-guṇātmane । triloka-dhṛte । harimāya-guṇopethāya । avyayāya । akṣara-rūpa-bhāje । paramātmane । parama-jyotiṣe । pañca-kṛtya-parāyaṇāya ॥ 60 ॥

ज्ञान-शक्त-बल्-ऐश्वर्य-वीर्य । तेज-प्रभामयाय । सदासत्-परमाय । पूर्णाय । वामयाय । वर्धाय । अच्युताय । जीवाय । हरये । हंस-रूपाय । पंचषट्-पीट-रूपकाय ॥ ७० ॥

jñāna-śakta-bal-aiśvarya-vīrya । teja-prabhāmayāya । sadāsat-paramāya । pūrṇāya । vāmayāya । vardhāya । acyutāya । jīvāya । haraye । haṁsa-rūpāya । pañcaṣaṭ-pīṭa-rūpakāya ॥ 70 ॥

मातृक-मंडल्-आध्यक्षाय । मधु-ध्वंसिने । मनो-मयाय । बुद्धि-रूपाय । चित्त-साक्षिने । साराय । हंसाक्षर-द्वयाय । मंत्र-यंत्र-प्रभवाय । मंत्र-यंत्रमयाय । विभवे ॥ ८० ॥

mātṛka-maṇḍal-ādhyakṣāya । madhu-dhvaṁsine । manomayāya । buddhi-rūpāya । citta-sākṣine । sārāya । haṁsākṣara-dvayāya । mantra-yantra-prabhavāya । mantra-yantramayāya । vibhave ॥ 80

स्रष्ट्रे । क्रियास्-पतये । शुद्धाय । मंत्रे । भोक्त्रे । त्रिविक्रमाय । निरायुधाय । असंरंभाय । सर्व-युध-समन्विताय । ओंकार-रूपाय ॥ ९० ॥

sraṣṭre । kriyās-pataye । śuddhāya । mantre । bhoktre । trivikramāya । nir-āyudhāya । asaṁraṁbhāya । sarva-yudha-samanvitāya । oṁkāra-rūpāya ॥ 90 ॥

पूर्णात्मने । ओंकारात्-साध्य-भंजनाय । ऐंकाराय । वाग्-प्रदाय । वाग्मिने । श्रींकार्-ऐश्वर्य-वर्धनाय । क्लीं-कार्-मोहन्-आकाराय । हुं-फट्-क्षोभनाकृतये । इंद्रार्चित-मनो-वेगाय । धरणि-भार-नाशकाय । वीराराध्याय ॥ १०० ॥

pūrṇātmane । oṁ-kārāt-sādhya-bhañjanāya । aiṁ-kārāya । vāg-pradāya । vāgmine । śrīṁ-kār-aiśvarya-vardhanāya । klīṁ-kār-mohan-ākārāya । huṁ-phaṭ-kṣobhanākṛtaye । indrārcita-mano-vegāya । dharaṇi-bhāra-nāśakāya । vīrārādhyāya ॥ 100 ॥

विश्वरूपाय । वैष्णवाय । विष्णु-भक्ति-दायकाय । सत्य-व्रताय । सत्य-पराय । सत्य-धर्मानुषंगकाय । नारायण-कृप-व्यूह-तेज-चक्राय । श्री सुदर्शनाय ॥ १०८ ॥

viśvarūpāya । vaiṣṇavāya । viṣṇu-bhakti-dāyakāya । satya-vratāya । satya-parāya । satya-dharmānuṣaṅgakāya । nārāyaṇa-kṛpa-vyūha-teja-cakrāya । śrī sudarśanāya ॥

5. Śrīraṅganātha aṣṭhottara śata-nāmavalih

श्री-रंग-नाथाय नमः । देवेशाय । श्री-रंग-ब्रह्म-संज्ञकाय । शेष-पर्यंक-शयनाय । श्री-निवास-भुजांतराय । इंद्र-नीलोपल-श्यामाय । पुंडरीक-निभेक्षणाय । श्री-वत्स-लांचिताय । हारिणे । वन-मालिने ॥ १० ॥

śrī-raṅga-nāthāya namaḥ । deveśāya । śrī-raṅga-brahma-saṁjñakāya । śeṣa-paryaṅka-śayanāya । śrī-nivāsa-bhujāntarāya । indra-nīlopala-śyāmāya । puṇḍarīka-nibhekṣaṇāya । śrī-vatsa-lāñcitāya । hāriṇe । vana-māline ॥ 10 ॥

हला-युधाय । पीतांबर-धराय । देवाय । नराय । नारायणाय । हरये । श्रीभू- सहिताय । पुरुषाय । महा-विष्णवे । सनातनाय ॥ २० ॥

halā-yudhāya । pītāmbara-dharāya । devāya । narāya । nārāyaṇāya । haraye । śrībhū- sahitāya । puruṣāya । mahā-viṣṇave । sanātanāya ॥ 20 ॥

सिंहासनस्थाय । भगवते । वासुदेवाय । प्रभावृताय । कंदर्प कोटिलावण्याय । कस्तूरि-तिलकाय । अच्युताय । शंख - चक्र - गदा-पद्म - सुलक्षित-चतुर्भुजाय । श्रीमत्सुंदरजामात्रे । नाथाय ॥ ३० ॥

siṁhāsanasthāya । bhagavate । vāsudevāya । prabhāvṛtāya । kandarpa koṭilāvaṇyāya । kastūri-tilakāya । acyutāya । śaṅkha - cakra - gadā-padma - sulakṣita-caturbhujāya । śrīmatsundarajāmātre । nāthāya ॥ 30 ॥

देव-शिखामणये । श्री-रंग-नायकाय । लक्ष्मि-वल्लभाय । तेजसां-निधये । सर्व-शर्म-प्रदाय । अहिशाय । साम-गान-प्रियोत्सवाय । अमृतत्व-प्रदाय । नित्याय । सर्व-प्रभवे ॥ ४० ॥

deva-śikhāmaṇaye । śrī-raṅga-nāyakāya । lakṣmi-vallabhāya । tejasāṁ-nidhaye । sarva-śarma-pradāya । ahiśāya । sāma-gāna-priyotsavāya । amṛtatva-pradāya । nityāya । sarva-prabhave ॥ 40 ॥

अरिंदमाय । श्री-भद्र-कुंकुम्-आलिप्ताय । श्रीमूर्तये । चित्त-रङ्जिताय । सर्व-लक्षण्-संपन्नाय । शांतात्मने । तीर्थनायकाय । श्रीरंगनायकीशाय । यज्ञमूर्तये । हिरण्मयाय ॥ ५० ॥

arindamāya । śrī-bhadra-kuṅkum-āliptāya । śrīmūrtaye । citta-raṅjitāya । sarva-lakṣaṇ-sampannāya । śāntātmane । tīrthanāyakāya । śrīraṅganāyakīśāya । yajñamūrtaye । hiraṇmayāya ॥ 50 ॥

प्रणवाकार-सदनाय । प्रणतार्थ-प्रदायकाय । गोदा-प्राणेश्वराय । कृष्णाय । जगन्-नाथाय । जयद्रथाय । निचुलापुर-वल्लीशाय । नित्य-मंगल-दायकाय । गंध-स्तंभ-द्वयो-ल्लास-गायत्री-रूपमंडपाय । भृत्य-वर्ग-शरण्याय ॥ ६० ॥

praṇavākāra-sadanāya । praṇatārtha-pradāyakāya । godā-prāṇeśvarāya । kṛṣṇāya । jagan-nāthāya । jayadrathāya । niculāpura-vallīśāya । nitya-maṅgala-dāyakāya । gandha-stambha-dvayo-llāsa-gāyatrī-rūp-amaṇḍapāya । bhṛtya-varga-śaraṇyāya ॥ 60 ॥

बल-भद्र-प्रसादकाय । वेद-शृंग-विमान-स्थाय । व्याघ्रासुर निषूदकाय । गरुडानंत-सेनेश-गज-वक्त्रादि-सेविताय । शंकर-प्रिय-माहात्म्याय । श्यामाय । शंतनु-वंदिताय । पांचरात्रार्चिताय । नेत्रे । भक्त-नेत्रोत्सव-प्रदाय ॥ ७० ॥

bala-bhadra-prasādakāya । veda-śṛṅga-vimāna-sthāya । vyāghrāsura niṣūdakāya । garuḍānanta-seneśa-gaja-vaktrādi-sevitāya । śaṅkara-priya-māhātmyāya । śyāmāya । śantanu-vanditāya । pāñcarātrārcitāya । netre । bhakta-netrotsava-pradāya ॥ 70 ॥

कलशांभोधि-निलयाय । कमलासन-पूजिताय । सनंदनंद -सनक-सुत्रामामर-सेविताय । सत्य-लोक-पुरावासाय । चक्षुषे । अष्टाक्षराय । अव्ययाय । इक्ष्वाकु-पूजिताय । वसिष्ठादि-स्तुताय । अनघाय ॥ ८० ॥

kalaśāmbhodhi-nilayāya । kamalāsana-pūjitāya । sananda-nanda -sanaka-sutrāmāmara-sevitāya । satya-loka-purāvāsāya । cakṣuṣe । aṣṭākṣarāya । avyayāya । ikṣvāku-pūjitāya । vasiṣṭhādi-stutāya । anaghāya ॥ 80 ॥

राघवाराधिताय । स्वामिने । रामाय । राजेंद्र-वंदिताय । विभीषण्-आर्चितपदाय । लंका-राज्य-वर-प्रदाय । कावेरी-मध्य-निलयाय । कल्याण-पुर-वास्तुकाय । धर्म-वर्मादि-चोलेंद्र-पूजिताय । पुण्य-कीर्तनाय ॥ ९० ॥

rāghavārādhitāya । svāmine । rāmāya । rājendra-vanditāya । vibhīṣaṇ-ārcitapadāya । laṅkā-rājya-vara-pradāya । kāverī-madhya-nilayāya । kalyāṇa-pura-vāstukāya । dharma-varmādi-colendra-

pūjitāya | puṇya-kīrtanāya || 90 ||

पुरुषोत्तम-कृत-स्थानाय । भू-लोक-जन-भाग्यदाय । अज्ञान-दमन-ज्योतिषे । अर्जुन-प्रिय-सारथये । चंद्र-पुष्करिणी-नाथाय । चंडादि-द्वार-पालकाय । कुमुदादि-परिवाराय । पांड्य-सारूप्य-दायकाय । सप्तावरण-संवीत-सदनाय । सुर-पोषकाय ॥ १०० ॥

puruṣottama-kṛta-sthānāya | bhū-loka-jana-bhāgyadāya | ajñāna-damana-jyotiṣe | arjuna-priya-sārathaye | candra-puṣkariṇī-nāthāya | caṇḍādi-dvāra-pālakāya | kumudādi-parivārāya | pāṇḍya-sārūpya-dāyakāya | saptāvaraṇa-saṁvīta-sadanāya | sura-poṣakāya || 100 ||

नवनीत-शुभाहाराय । विहारिणे । नारद-स्तुताय । रोहिणी-जन्मताराय । कार्तिकेय-वर-प्रदाय । श्रीरंगाधिपतये । श्रीमते । श्रीमद्रंग-महा-निधये ॥१०८॥ श्री-रंग-नाथाय । श्रीरंग-परब्रह्मणे ॥

navanīta-śubhāhārāya | vihāriṇe | nārada-stutāya | rohiṇī-janmatārāya | kārtikeya-vara-pradāya | śrīraṅgādhipataye | śrīmate | śrīmad-raṅga-mahā-nidhaye ॥108॥ śrī-raṅga-nāthāya | śrīraṅga-parabrahmaṇe ॥

6. Śrī Lakṣmī aṣṭhottara śata-nāmavalliḥ

ॐ प्रकृत्यै नमः । विकृत्यै । विद्यायै । सर्व-भूत-हित-प्रदायै । श्रद्धायै । विभूत्यै । सुरभ्यै । परम्-आत्मिकायै । वाचे । पद्मालयायै ॥ १० ॥

oṁ prakṛtyai namaḥ | vikṛtyai | vidyāyai | sarva-bhūta-hita-pradāyai | śraddhāyai | vibhūtyai | surabhyai | param-ātmikāyai | vāce | padmālayāyai || 10 ||

पद्मायै । शुचये । स्वाहायै । स्वधायै । सुधायै । धन्यायै । हिरण्मय्यै । लक्ष्म्यै । नित्य-पुष्टायै । विभावर्यै ॥ २०

padmāyai | śucaye | svāhāyai | svadhāyai | sudhāyai | dhanyāyai | hiraṇmayyai | lakṣmyai | nitya-puṣṭāyai | vibhāvaryai || 20 ||

अदित्यै । दित्यै । दीप्तायै । वसुधायै । वसु-धारिण्यै । कमलायै । कान्त्यै । कामाक्ष्यै । क्षीरोद-सम्भवायै । अनुग्रह-परायै ॥ ३० ॥

adityai | dityai | dīptāyai | vasudhāyai | vasu-dhāriṇyai | kamalāyai | kāntyai | kāmākṣyai | kṣīroda-sambhavāyai | anugraha-parāyai || 30 ||

ऋद्ध्यै । अनघायै । हरि-वल्लभायै । अशोकायै । अमृतायै । दीप्तायै । लोक-शोक-विनाशिन्यै । धर्म-निलयायै । करुणायै । लोक-मात्रे ॥ ४० ॥

ṛddhyai | anaghāyai | hari-vallabhāyai | aśokāyai | amṛtāyai | dīptāyai | loka-śoka-vināśinyai | dharma-nilayāyai | karuṇāyai | loka-mātre || 40 ||

पद्म-प्रियायै । पद्म-हस्तायै । पद्माक्ष्यै । पद्म-सुन्दर्यै । पद्मोद्भवायै । पद्म-मुख्यै । पद्म-नाभ-प्रियायै । रमायै । पद्म-माला-धरायै । देव्यै ॥ ५० ॥

padma-priyāyai | padma-hastāyai | padmākṣyai | padma-sundaryai | padmodbhavāyai | padma-mukhyai | padma-nābha-priyāyai | ramāyai | padma-mālā-dharāyai | devyai || 50 ||

पद्म-गन्धिन्यै । पद्मिन्यै । पुण्य-गन्धायै । सु-प्रसन्नायै । प्रसाद्-आभि-मुख्यै । प्रभायै । चन्द्र-वदनायै । चन्द्रायै । चन्द्र-सहोदर्यै । चतुर्-भुजायै ॥ ६० ॥

padma-gandhinyai | padminyai | puṇya-gandhāyai | su-prasannāyai | prasād-ābhi-mukhyai | prabhāyai | candra-vadanāyai | candrāyai | candra-sahodaryai | catur-bhujāyai || 60 ||

चन्द्र-रूपायै । इन्दिरायै । इन्दु-शीतलायै । आह्लाद-जनन्यै । पुष्ट्यै । शिवायै । शिवञ्-कर्यै । सत्यै । विमलायै । विश्व-जनन्यै ॥ ७० ॥

candra-rūpāyai | indirāyai | indu-śītalāyai | āhlāda-jananyai | puṣṭyai | śivāyai | śivañ-karyai | satyai | vimalāyai | viśva-jananyai || 70 ||

तुष्ट्यै । दारिद्र्य-नाशिन्यै । प्रीति-पुष्करिण्यै । शान्तायै । शुक्ल-माल्याम्बरायै । श्रियै । भास्कर्यै । बिल्व-निलयायै । वरारोहायै । यशस्विन्यै ॥ ८० ॥

tuṣṭyai | dāridrya-nāśinyai | prīti-puṣkariṇyai | śāntāyai | śukla-mālyāmbarāyai | śriyai | bhāskaryai | bilva-nilayāyai | varārohāyai | yaśasvinyai || 80 ||

वसुन्धरायै । उदाराङ्गायै । हरिण्यै । हेम-मालिन्यै । धन-धान्य-कर्यै । सिद्ध्यै । स्त्रैण-सौम्यायै । शुभ-प्रदायै । नृप-वेश्म गतानन्दायै । वर-लक्ष्म्यै ॥ ९० ॥

vasundharāyai | udārāṅgāyai | hariṇyai | hema-mālinyai | dhana-dhānya-karyai | siddhyai | straiṇa-saumyāyai | śubha-pradāyai | nṛpa-veśma gatānandāyai | vara-lakṣmyai || 90 ||

वसु-प्रदायै । शुभायै । हिरण्य-प्राकारायै । समुद्र-तनयायै । जयायै । मङ्गला-देव्यै । विष्णु-वक्षस्-स्थल-स्थितायै । विष्णु-पत्न्यै । प्रसन्न्-आक्ष्यै । नारायण-समाश्रितायै । दारिद्य-ध्वंसिन्यै । देव्यै । सर्वो-पद्रव वारिण्यै । नव-दुर्गायै । महा-काल्यै । ब्रह्म-विष्णु-शिवात्मिकायै । त्रिकाल-ज्ञान-संपन्नायै । भुवनेश्वर्यै ॥ १०८ ॥

vasu-pradāyai | śubhāyai | hiraṇya-prākārāyai | samudra-tanayāyai | jayāyai | maṅgalā-devyai | viṣṇu-vakṣas-sthala-sthitāyai | viṣṇu-patnyai | prasann-ākṣyai | nārāyaṇa-samāśritāyai | dāridya-dhvaṁsinyai | devyai | sarvo-padrava vāriṇyai | nava-durgāyai | mahā-kālyai | brahma-viṣṇu-śivātmikāyai | trikāla-jñāna-saṁpannāyai | bhuvan-eśvaryai || 108 ||

7. Śrī Veṅkaṭevara aṣṭhottara śata-nāmavalih

श्री वेंकटेशाय नमः । श्री-निवासाय । लक्ष्मी-पतये । अनामयाय । अमृतांशाय । जगद्-वंद्याय । गोविंदाय । शाश्वताय । प्रभवे । शेशाद्रि-निलायाय ॥ १० ॥

śrī veṅkaṭeśāya namaḥ | śrī-nivāsāya | lakṣmī-pataye | anāmayāya | amṛtāṁśāya | jagad-vandyāya | govindāya | śāśvatāya | prabhave | śeśādri-nilāyāya || 10 ||

देवाय । केशवाय । देवाय । मधु-सूदनाय । अमृताय । कृष्णाय । श्री-हरये । ज्ञान-पंजराय । श्रीवत्स वक्षसे । सर्वेशाय ॥ २० ॥

devāya | keśavāya | devāya | madhu-sūdanāya | amṛtāya | kṛṣṇāya | śrī-haraye | jñāna-pañjarāya | śrīvatsa vakṣase | sarveśāya || 20 ||

गोपालाय । पुरुषोत्तमाय । गोपीश्वराय । परञ्-ज्योतिषे । वैकुंठ-पतये । अव्ययाय । सुधा-तनवे । यादवेंद्राय । चतुर्-वेदात्मकाय ॥ ३० ॥

gopālāya | puruṣottamāya | gopīśvarāya | parañ-jyotiṣe | vaikuṇṭha-pataye | avyayāya | sudhā-tanave | yādavendrāya | catur-vedātmakāya || 30 ||

विष्णवे । अच्युताय । पद्मिनी-प्रियाय । धरा-पतये । सुर-पतये । निर्मलाय । देव-पूजिताय । चतुर्-भुजाय । चक्र-धराय । त्रि-धाम्ने ॥ ४० ॥

viṣṇave | acyutāya | padminī-priyāya | dharā-pataye | sura-pataye | nirmalāya | deva-pūjitāya | catur-bhujāya | cakra-dharāya | tri-dhāmne || 40 ||

त्रि-गुणाश्रयाय । निर्विकल्पाय । निष्कलंकाय । निरांतकाय । निरंजनाय । निराभासाय । नित्य तृप्ताय । निर्-उप्रदवाय । निर्-गुणाय । गदा-धराय ॥ ५० ॥

tri-guṇāśrayāya | nirvikalpāya | niṣkalaṅkāya | nirāntakāya | nirañjanāya | nirābhāsāya | nitya tṛptāya | nir-upradavāya | nir-guṇāya | gadā-dharāya || 50 ||

शार्ङ्ग-पाणये । नंदकिने । शंख-धारकाय । अनेक-मूर्तये । अव्यक्ताय । कटि-हस्ताय । वर-प्रदाय । अनेकात्मने । दीन-बंधवे । आर्त-लोकाभय-प्रदाय ॥ ६० ॥

śārṅga-pāṇaye | nandakine | śaṅkha-dhārakāya | aneka-mūrtaye | avyaktāya | kaṭi-hastāya | vara-pradāya | anekātmane | dīna-bandhave | ārta-lokābhaya-pradāya ॥ 60

आकाश-राज-वरदाय । योगि-हृत्-पद्म-मंदिराय । दामोदराय । जगत्-पालाय । पापघ्नाय । भक्त-वत्सलाय । त्रि-विक्रमाय । शिंशुमाराय । जटामकुट शोभिताय । शंख मद्योल्ल सन्मंजु किंकिण्याढ्य करंडकाय ॥ ७० ॥

ākāśa-rāja-varadāya | yogi-hṛt-padma-mandirāya | dāmodarāya | jagat-pālāya | pāpaghnāya | bhakta-vatsalāya | tri-vikramāya | śiṁśumārāya | jaṭāmakuṭa śobhitāya | śaṅkha madyolla sanmañju kiṁkiṇyāḍhya karaṇḍakāya ॥ 70 ॥

नील-मेघ-श्याम तनवे । बिल्व-पत्रार्चन प्रियाय । जगद्-व्यापिने । जगत्-कर्त्रे । जगत्-साक्षिणे । जगत्-पतये । चिंतितार्थ प्रदायकाय । जिष्णवे । दाशार्हाय । दश-रूपवते ॥ ८० ॥

nīla-megha-śyāma tanave | bilva-patrārcana priyāya | jagad-vyāpine | jagat-kartre | jagat-sākṣiṇe | jagat-pataye | cintitārtha pradāyakāya | jiṣṇave | dāśārhāya | daśa-rūpavate ॥ 80 ॥

देवकी नंदनाय । शौरये । हय-ग्रीवाय । जनार्दनाय । कन्या-श्रवण-तारेज्याय । पीतांबर-धराय । अनघाय । वनमालिने । पद्म-नाभाय । मृगयासक्त मानसाय ॥ ९० ॥

devakī nandanāya | śauraye | haya-grīvāya | janārdanāya | kanyā-śravaṇa-tārejyāya | pītāmbara-dharāya | anaghāya | vanamāline | padma-nābhāya | mṛgayāsakta mānasāya ॥ 90 ॥

अश्वरूढाय । खड्ग-धारिणे । धनार्जन समुत्सुकाय । घन-सार-लसन्-मध्य कस्तूरी तिलकोज्ज्वलाय । सच्चितानंद-रूपाय । जगन्-मंगल दायकाय । यज्ञ-भोक्त्रे । चिन्मयाय । परमेश्वराय ॥ १०० ॥

aśvarūḍhāya | khaḍga-dhāriṇe | dhanārjana samutsukāya | ghana-sāra-lasan-madhya kastūrī tilakojjvalāya | saccitānanda-rūpāya | jagan-maṅgala dāyakāya | yajña-bhoktre | cinmayāya | parameśvarāya ॥ 100 ॥

परमार्थ प्रदायकाय । शांताय । श्रीमते । दोर्दंड विक्रमाय । परात्-पराय । पर-ब्रह्मणे । श्रीविभवे । जगदीश्वराय । अलमेलु मंगा समेत वेंकटेश्वराय नमः ॥

paramārtha pradāyakāya | śāntāya | śrīmate | dordaṇḍa vikramāya | parāt-parāya | para-brahmaṇe | śrīvibhave | jagadīśvarāya | alamelu maṅgā sameta veṅkaṭeśvarāya namaḥ ॥

8. Rāmānuja Aṣṭhottara

ॐ रामानुजाय नमः । पुष्कराक्षाय । यतींद्राय । करुणाकराय । कांति-मध्यात्मजाय । श्रीमते । लीला-मानुष-विग्रहाय । सर्व-शास्त्रार्थ-तत्त्व-ज्ञाय । सर्व-ज्ञाय । सज्जन-प्रियाय ॥ १० ॥

oṁ rāmānujāya namaḥ | puṣkarākṣāya | yatīndrāya | karuṇākarāya | kānti-madhyātmajāya | śrīmate | līlā-mānuṣa-vigrahāya | sarva-śāstrārtha-tattva-jñāya | sarva-jñāya | sajjana-priyāya ॥ 10

नारायण-कृपा-पात्राय । श्री-भूत-पुर-नायकाय । अनघाय । भक्त-मंदाराय । केशवानंद-वर्धनाय । कांचि-पूर्ण-प्रीय-सखाय । प्रणतार्ति-विनाशकाय । पुण्य-संकीर्तनाय । पुण्याय । ब्रह्म-राक्षस-मोचकाय ॥ २० ॥

nārāyaṇa-kṛpā-pātrāya | śrī-bhūta-pura-nāyakāya | anaghāya | bhakta-mandārāya | keśavānanda-vardhanāya | kāñci-pūrṇa-prīya-sakhāya | praṇatārti-vināśakāya | puṇya-saṁkīrtanāya | puṇyāya | brahma-rākṣasa-mocakāya ॥ 20 ॥

यादव-पादिता-पार्थ-वृक्ष-छेद-कुटारकाय । अमोघाय । लक्ष्मण-मुनये । शारदा-षोक-नाशनाय । निरंतर-जनाज्ञान-विमोचन-विचक्षनाय । वेदांत-द्वय-सार-ज्ञाय । वरदांबु-प्रदायकाय । पराभिप्राय-तत्त्व-ज्ञाय । यामुन-अंगुलि-मोचकाय । देव-राज-कृप-लब्ध-षड्-वाक्यार्थ-महो-दधये ॥ ३० ॥

yādava-pāditā-pārtha-vṛkṣa-cheda-kuṭārakāya । amoghāya । lakṣmaṇa-munaye । śāradā-ṣoka-nāśanāya । nirantara-janājñāna-vimocana-vicakṣanāya । vedānta-dvaya-sāra-jñāya । varadāmbu-pradāyakāya । parābhiprāya-tattva-jñāya । yāmuna-aṅguli-mocakāya । deva-rāja-kṛpa-labdha-ṣaḍ-vākyārtha-maho-dadhaye ॥ 30 ॥

पूर्णार्य-लब्ध-सन्-मंत्राय । शौरि-पादाब्ज-षट्-पदाय । त्रि-दंड-धारिणे । ब्रह्म-ज्ञाय । ब्रह्म-ज्ञान-परायणाय । रंगेश-कैंकर्य-रथाय । विभूति-द्वय-नायकाय । गोष्टि-पूर्ण-कृप-लब्ध-मंत्र-राज-प्रकाशकाय । वरारंगानुकंपात्त-द्राविडाम्नाय-पारगाय । मालाधरार्य-सुज्ञात-द्राविड्-आम्नाय-तत्त्वधिये ॥ ४० ॥

pūrṇārya-labdha-san-mantrāya । śauri-pādābja-ṣaṭ-padāya । tri-daṇḍa-dhāriṇe । brahma-jñāya । brahma-jñāna-parāyaṇāya । raṅgeśa-kaiṅkarya-rathāya । vibhūti-dvaya-nāyakāya । goṣṭi-pūrṇa-kṛpa-labdha-mantra-rāja-prakāśakāya । varāraṅgānukampātta-drāviḍāmnāya-pāragāya । mālādharārya-sujñāta-drāviḍ-āmnāya-tattvadhiye ॥ 40 ॥

चतुस्सप्त-शिश्याढ्याय । पंचाचार्य-पदाश्रयाय । प्रपीत-विष-तीर्थांब-प्रकटि-कृत-वैभवाय । प्रणतार्थि-हराचार्याय-दत्त-भीक्षैक-भोजनाय । पवित्री-कृत-कूरेशाय भागिनेय-त्रि-दंड-काय । कूरेश-दाशरथ्यादि-चरमार्थ-प्रकाशकाय । रंगेश-वेंकटेशादि-प्रकटि-कृत्-वैभवाय । देवराज-अर्चन-रताय । मूक-मुक्ति-प्रदायकाय ॥ ५० ॥

catus-sapta-śiśyāḍhyāya । pañcācārya-padāśrayāya । prapīta-viṣa-tīrthāmba-prakaṭi-kṛta-vaibhavāya । praṇatārthi-harācāryāya-datta-bhīkṣaika-bhojanāya । pavitrī-kṛta-kūreśāya bhāgineya-tri-daṇḍa-kāya । kūreśa-dāśarathyādi-caramārtha-prakāśakāya । raṅgeśa-veṅkaṭeśādi-prakaṭi-kṛt-vaibhavāya । devarāja-arcana-ratāya । mūka-mukti-pradāyakāya ॥ 50 ॥

यज्ञ-मूर्ति-प्रतिष्टात्रे । मन्नाथाय । धरणी-धराय । वरदाचार्य सद्-भक्ताय । यज्ञेशार्थि विनाशखय । अनंताभिष्ट-फल-दाय । विट्टलेश प्रपूजिताय । श्रीषैल-पूर्ण-करुणालब्ध-रामायणार्थकाय । प्रपत्ति धर्मैक-रताय । गोविंदार्य-प्रियानुजाय ॥ ६० ॥

yajña-mūrti-pratiṣṭātre । man-nāthāya । dharaṇī-dharāya । varadācārya sad-bhaktāya । yajñeśārthi vināśakhaya । anantābhiṣṭa-phala-dāya । viṭṭaleśa prapūjitāya । śrīṣaila-pūrṇa-karuṇālabdha-rāmāyaṇārthakāya । prapatti dharmaika-ratāya । govindārya-priyānujāya ॥ 60 ॥

व्यास-सूत्रार्थ-तत्त्व-ज्ञाय । बोधायन मतानुगाय । श्री-भाष्यादि महा-ग्रंथ-कारकाय । कलि-नाशनाय । अद्वैत-मत-विच्छेत्रे । विशिष्टाद्वैत-पारगाय । कुरंग-नगरी-पूर्ण मंत्र-रत्नोपदेशिकाय । विनाशितेतर-मताय । शेषी-कृत रमापतये । पुत्री-कृत शठारातये ॥ ७० ॥

vyāsa-sūtrārtha-tattva-jñāya । bodhāyana matānugāya । śrī-bhāṣyādi mahā-grantha-kārakāya । kali-nāśanāya । advaita-mata-vicchetre । viśiṣṭādvaita-pāragāya । kuraṅga-nagarī-pūrṇa mantra-ratnopadeśikāya । vināś-itetara-matāya । śeṣī-kṛta ramāpataye । putrī-kṛta śaṭhārātaye ॥ 70 ॥

शठ-जीते । र्ण-मोचकाय । भाषा-दत्त-हय-ग्रीवाय । भाष्य-काराय । महा-यशसे । पवित्री-कृत भु-भागाय । कूर्म-नाथ प्रकाशकाय । श्री-वेंकटाचलाधीश शंख-चक्र-प्रदायकाय । श्री-वेंकटेश-श्वशुराय । श्री-राम-सक देशिकाय ॥ ८० ॥

śaṭha-jīte । rṇa-mocakāya । bhāṣā-datta-haya-grīvāya । bhāṣya-kārāya । mahā-yaśase । pavitrī-kṛta bhu-bhāgāya । kūrma-nātha prakāśakāya । śrī-veṅkaṭācalādhīśa śaṅkha-cakra-pradāyakāya । śrī-venkaṭeśa-śvaśurāya । śrī-rāma-saka deśikāya ॥ 80

कृपा-मात्र प्रसन्नार्याय । गोपिका मोक्ष-दायकाय । समीचीनार्य सच्छिश्य सत्-कृताय । वैष्णव-प्रियाय । कृमि-कांट-नृप-ध्वंसीने । सर्व मंत्र महोदधये । अंगी-कृतांध्र-पूर्णार्याय । सालग्राम प्रतिष्टिथाय । श्री भक्त-ग्राम-पूर्णेशाय । विष्णु-वर्धन रक्षकाय ॥ ९० ॥

kṛpā-mātra prasann-āryāya । gopikā mokṣa-dāyakāya । samīcīnārya sac-chiśya sat-kṛtāya । vaiṣṇava-priyāya । kṛmi-kāṇṭa-nṛpa-dhvaṁsīne । sarva mantra mahodadhaye । aṅgī-kṛtāndhra-pūrṇāryāya । sālagrāma pratiṣṭithāya । śrī bhakta-grāma-pūrṇeśāya । viṣṇu-vardhana rakṣakāya ॥ 90 ॥

बौध-ध्वांत सहस्त्रांशवे । शेष-रूप-प्रदर्शकाय । नगरी-कृत वेदाद्रये । डिल्लीष्वर समर्चिताय । नारायण प्रतिष्टात्रे । संपत्-पुत्र विमोचकाय । संपत्-कुमार जनकाय । साधु-लोक शिखामणये । सुप्रतिष्टित गोविंद-राजाय । पूर्ण-मनोरथाय ॥ १०० ॥

baudha-dhvānta sahasrāṁśave । śeṣa-rūpa-pradarśakāya । nagarī-kṛta vedādraye । ḍillīṣvara samarcitāya । nārāyaṇa pratiṣṭātre । saṁpat-putra vimocakāya । saṁpat-kumāra janakāya । sādhu-loka śikhāmaṇaye । supratiṣṭita govinda-rājāya । pūrṇa-manorathāya ॥ 100 ॥

गोदाग्रजाय । दिग्-विजेत्रे । गोदाभिष्ठ प्रपूरकाय । सर्व-संशय-विच्छेत्रे । विष्णु-लोक प्रदायकाय । अव्याहत-महद्वर्त्मने । यति-राजाय । जगत्-गुरवे ॥ १०८ ॥ ॐ श्रीमते रामाणुजाय नमः ॥

godāgrajāya । dig-vijetre । godābhiṣṭha prapūrakāya । sarva-samśaya-vicchetre । viṣṇu-loka pradāyakāya । avyāhata-mahad-vartmane । yati-rājāya । jagat-gurave ॥ 108 ॥ oṁ śrīmate rāmāṇujāya namaḥ ॥

Puṣpāñjali

वंदे विश्वासनं देवं विश्वाख्यं विश्वतो मुखं । विश्वतः श्रुति मूल्यं च विश्व-रूपं नमाम्यहं ॥ १ ॥
vande viśvāsanaṁ devaṁ viśvākhyaṁ viśvato mukhaṁ ।
viśvataḥ śruti mūlyaṁ ca viśva-rūpaṁ namāmyahaṁ ॥ 1 ॥
I bow to the Lord who is the seat of the universe, known as the universe, facing all directions, the root of all scriptures, and of universal form.

नारायण नमस्तेऽस्तु लक्ष्मी नारायण प्रभो । विष्णु नारायणः साक्षात्रुद्रो नारायणः स्वयम् ॥ २ ॥
nārāyaṇa namaste'stu lakṣmī nārāyaṇa prabho ।
viṣṇu nārāyaṇaḥ sākṣāt rudro nārāyaṇaḥ svayam ॥ 2 ॥
Salutations to you, Narayana, Lord Lakshmi-Narayana. Vishnu is Narayana, and Rudra is Narayana himself.

ब्रह्मादित्यश्च वायुश्च हरि नारायणस्तथा । नारायणश्च भूतानि वह्निर्नारायणः परः ॥ ३ ॥
brahmādityaśca vāyuśca hari nārāyaṇas tathā ।
nārāyaṇaśca bhūtāni vahnir nārāyaṇaḥ paraḥ ॥ 3 ॥
Brahma, the Sun, Wind, and Hari are all Narayana. All beings are Narayana, and Fire is the supreme Narayana.

सर्वं नारायणो देवो नारायण नमो ऽस्तु ते । नारायणस्त्वमेवैकः सर्वं व्याप्य व्यवस्थितः ॥ ४ ॥
sarvaṁ nārāyaṇo devo nārāyaṇa namo 'stu te ।
nārāyaṇas tvam evaikaḥ sarvaṁ vyāpya vyavasthitaḥ ॥ 4 ॥
Everything is Lord Narayana. Salutations to you, Narayana. You alone are Narayana, pervading and existing in everything.

अंतर्-बहिश्च भूतानां नित्यो गम्यो न केनचित् । सर्वेषां कारणं पूर्वं वाग्भिर्वाच्यो न कस्यचित् ॥ ५ ॥
antar-bahiśca bhūtānāṁ nityo gamyo na kenacit ।
sarveṣāṁ kāraṇaṁ pūrvaṁ vāgbhir vācyo na kasyacit ॥ 5 ॥
You are within and without all beings, eternal, inaccessible to anyone. You are the prime cause of all, indescribable by words.

भूत भव्य भवद्यच्च विश्वं सर्वं त्वयि स्थितम् । उद्बोधकश्च शक्तिनां तथापि त्वं न गम्यसे ॥ ६ ॥
bhūta bhavya bhavad yacca viśvaṁ sarvaṁ tvayi sthitam ।
udbodhakaśca śaktināṁ tathāpi tvaṁ na gamyase ॥ 6 ॥
The past, present, future, and the entire universe reside in you. You are the awakener of all powers, yet you remain unfathomable.

स्वरूपं नैव चाकारो नालांकारस्त्वयि प्रभो । एवं चेदपि भक्तानां कार्यार्थं रूपमुद्धृतम् ॥ ७ ॥
svarūpaṁ naiva cākāro nālāṅkāras tvayi prabho ।
evaṁ cedapi bhaktānāṁ kāryārthaṁ rūpam uddhṛtam ॥ 7 ॥
You have no form or ornaments, O Lord. Yet, for the sake of your devotees, you assume a form.

रूपेणानेन देवेश मामुद्धर भवार्णवात् । योगिनां सिद्ध रूपोऽसि ज्ञानिनां ज्ञं प्रकाशसे ॥ ८ ॥
rūpeṇānena deveśa mām uddhara bhavārṇavāt ।
yogināṁ siddha rūpo'si jñānināṁ jñaṁ prakāśase ॥ 8 ॥
O Lord of Gods, with this form, lift me from the ocean of existence. You are the perfected form for yogis, and you shine as knowledge for the wise.

यथा ये चिंतयंतेऽङ्घ्रि तत्तद्भवति निश्चितम् । ज्ञात्वैवं चिंत्यते भुमंस्तत्कुरुष्व दया-निधे ॥ ९ ॥
कामये तव पादाब्जं सर्व काम प्रपूरकम् ॥ १० ॥
yathā ye cintayante'ṅghri tat tad bhavati niścitam ।
jñātvaivaṁ cintyate bhumaṁs tat kuruṣva dayā-nidhe ॥ 9 ॥
kāmaye tava pādābjaṁ sarva kāma prapūrakam ॥ 10 ॥
Whatever form your devotees meditate upon, that you become. Knowing this, O Lord, I contemplate you. O Ocean of Mercy, please fulfill this. I desire your lotus feet, which fulfill all desires.

ज्ञात्वैनं त्वां नमस्करोमि - वत्साय नमो वत्स-रूपाय नमो वत्स भूपाय नमो वत्स पालाय नमो वत्स कालाय नमो वत्स-हराय नमो वत्स चराय नमो वत्स धराय नमो वत्स पराय नमो नमः ॥ १ ॥
jñātvainaṁ tvāṁ namas-karomi - vatsāya namo vatsa-rūpāya namo vatsa bhūpāya namo vatsa pālāya namo vatsa kālāya namo vatsa-harāya namo vatsa carāya namo vatsa dharāya namo vatsa parāya namo namaḥ ॥ 1 ॥

Salutations to the calf, to the calf-form, to the lord of calves, to the protector of calves, to the time of calves, to the remover of calves, to the mover among calves, to the supporter of calves, to the supreme calf - repeated salutations.

गरुडाय नमो गरुड रूपाय नमो गरुड भूपाय नमो गरुड प्रियाय नमो गरुड अंकाय नमो गरुड वाहनाय नमो गरुड पोषकाय नमो नमः ॥ २ ॥
garuḍāya namo garuḍa rūpāya namo garuḍa bhūpāya namo garuḍa priyāya namo garuḍa aṅkāya namo garuḍa vāhanāya namo garuḍa poṣakāya namo namaḥ ॥ 2 ॥

Salutations to Garuda, to the Garuda-form, to the lord of Garuda, to the beloved of Garuda, to the lap of Garuda, to the vehicle Garuda, to the nourisher of Garuda - repeated salutations.

विश्वाय नमो विश्व पालाय नमो विश्व कालाय नमः कालाय नमः काल-कालाय नमः सर्वाय नमः सर्व रूपाय नमः सर्व भूपाय नमः सर्व हरायः नमः सर्व कराय नमः सर्व धराय नमो नमः ॥ ३ ॥
viśvāya namo viśva pālāya namo viśva kālāya namaḥ kālāya namaḥ kāla-kālāya namaḥ sarvāya namaḥ sarva rūpāya namaḥ sarva bhūpāya namaḥ sarva harāyaḥ namaḥ sarva karāya namaḥ sarva dharāya namo namaḥ ॥ 3 ॥

Salutations to the universe, to the protector of the universe, to the time of the universe, to time, to the time of time, to all, to all forms, to the lord of all, to the remover of all, to the creator of all, to the supporter of all - repeated salutations.

विश्वेभ्यो विश्वरूपेभ्यो नमस्तेऽस्तु सर्व रूपेभ्यः | बालाय नमो बाल-कृष्णाय नमः सर्व भूत कामनाय नमः ॥

viśvebhyo viśvarūpebhyo namaste'stu sarva rūpebhyaḥ ॥
bālāya namo bāla-kṛṣṇāya namaḥ sarva bhūta kāmanāya namaḥ ॥

Salutations to all universal forms, salutations to all your forms. Salutations to the child, to child Krishna, salutations to the fulfiller of desires of all beings.

ॐ नमो भगवते वासुदेवाय कृष्णश्च प्रसीदतां । सर्वतः पाणि-पादांतं सर्वतोऽक्षिशिरो मुखम् । सर्वतः श्रुतिमन्लोके सर्वमावृत्य तिष्ठति ॥

oṁ namo bhagavate vāsudevāya kṛṣṇaśca prasīdatāṁ । sarvataḥ pāṇi-pādāntaṁ sarvato'kṣiśiro mukham । sarvataḥ śrutiman loke sarvam āvṛtya tiṣṭhati ॥

Om, salutations to Lord Vasudeva. May Krishna be pleased. With hands and feet everywhere, with eyes, heads and mouths everywhere, with ears everywhere, he exists encompassing all in the world.

Agnir-nāmāni

Names of the fires.

Kriya	Agni	Kriya	Agni
vivāha	yojaka	śānti kriya	mṛḍā
caturthi	śikhi	puṣṭi kriya	Varadā, baladā
garbhadāna	marutaḥ	abhicāra	krodha
puṁsavana	candra pavamāna	vaśi kriya	kāmadā
sīmanta	maṅgala	koṭi homa	mahāśanaḥ
jātakarma	pragalbha prabalaḥ	vara-dāna	kāmadā
nāmakaraṇa	pārthiva	lakṣa homa	abhiṣṭāda
annaprāśana	śuciḥ	laukika kriya	pāvakaḥ
cauḷa	sabhya	dīkṣa	samudbhava
godāna	sūrya	vaiśvadeva	pāvaka
visarga	vaiśvānara	prāyaścitte	viṭ
samavartana	kṣaya	devānām	havya-vāhana
pākayajña	pāvakaḥ	pitṛnām	kavya-vāhana
vṛṣotsarga	adhvaro		

DHYĀNA ŚLOKAS

Vaikuntha natha

सव्यं पादं प्रसार्य श्रित दुरित हरं दक्षिणं कुञ्चयित्वा ।
जानुन्यादाय सव्येतरम् इतर भुजं नाग भोगे निधाय ॥
पश्चाद् बाहु-द्वयेन प्रति-भट-शमने, धारयन् शङ्ख-चक्रे ।
देवी भूषादि जुष्टो जनयतु, जगतां शर्म वैकुण्ठ-नाथः ॥

savyaṃ pādaṃ prasārya śrita durita haraṁ dakṣiṇaṃ kuñcayitvā ।
jānunyādāya savyetaram itara bhujaṁ nāga-bhoge nidhāya ॥
paścād bāhu-dvayena prati-bhaṭa-śamane dhārayan śaṅkha cakre ।
devī bhūṣādi juṣṭo janayatu jagatāṃ śarma vaikuṇṭha-nāthaḥ ॥

The Lord of Vaikunta is seated on the Serpent Throne, with His left leg hanging down, with His right which removes the distress of those who take refuge in it, bent and kept upon the throne, with His right arm hanging over His right knee, and the left hand braced upon the throne, He holds in His back hands the conch and discus which are used for quelling the enemies, He sits in the company of His consorts and is well adorned; May He give happiness to the entire world.

Narasiṃha dhyāna śloka

बिभ्राणं शक्ति खड्गं ज्वलन-मथ शृणी कुन्त-दन्तौ कुठारं
चक्रं शङ्खाब्ज-पाशान् हल-मुसल-गदा-खेट-शूलाञ्श्च दोर्भिः ।
प्रत्यालीढं तमीषे त्रिनयन-लसितं पिङ्गकेशं सुदंष्ट्रम्
देवं पञ्चार्ध योगासन-लसित चतुश्चक्र-भास्यं नृसिंहम् ॥

bibhrāṇaṃ śakti khaḍgaṃ jvalana-matha sṛṇī kunta-dantau kuṭhāraṃ
cakraṃ śaṅkhābja-pāśān hala-musala-gadā-kheṭa-śūlāñśca dorbhiḥ ।
pratyālīḍhaṃ tamīṣe trinayana-lasitaṃ piṅgakeśaṃ sudaṃṣṭram
devaṃ pañcārdha yogāsana-lasita catuścakra-bhāsyaṃ nṛsiṃham ॥

I worship Lord Narasimha, who: Holds in his hands a spear, sword, flame, conch, trident, axe, discus, conch, lotus, noose, plow, pestle, mace, shield, and spear; Stands in the pratyalidha pose, adorned with three shining eyes, With tawny hair and fierce fangs; is a divine being, seated in the five-limbed yoga posture, radiant with four wheels (chakras), in the form of half-man, half-lion.

Lakṣmī narasiṁha dhyāna

सरस्चन्द्र निभं देवं शङ्ख-चक्र वराभयान् । बिभ्रानं पुण्डरिकाक्षं लक्ष्म्यालिङ्गित विग्रहम् ॥
सिंह वक्त्रं महाकायं नृसिंहं हृदीभावयेत् ।

sarascandra nibhaṁ devaṁ śaṅkha-cakra varābhayān ।
bibhrānaṁ puṇḍarikākṣaṁ lakṣmyāliṅgita vigraham ॥
siṁha vaktraṁ mahākāyaṁ nṛsiṁhaṁ hṛdībhāvayet ।

I contemplate in my heart upon the Lord Narasimha having a Lion face, with a huge body, with eyes like lotuses, the colour of the moon, holding the Conch and Discus, embracing mother Lakshmi.

Lakṣmī narasimha

श्रीमन् नृकेशरि तनो जगद् एक बन्धो, श्री नील-कण्थ करुणार्णव सामराज
वह्नीदुतीव्र कर नेत्र पिनाक पाणे शीतांशु शेकर रमेश्वर पाहि विष्णो ॥

śrīman nṛkeśari tano jagad eka bandho, śrī nīla-kaṇtha karuṇārṇava sāmarāja
vahnīdutīvra kara netra pināka pāṇe śītāṁśu śekara rameśvara pāhi viṣṇo ॥

Protect every one O Vishnu, the glorious one, O lord of the Man-lion form, the sole benefactor of the universe, the blue-necked one, the ocean of compassion, the Lord who manifest through the sama mantras, the one who has the sun and the moon for eyes and is armed with the pinaki bow, O lord of Lakshmi, with the moon as a crest ornament.

Mukunda

क्षीरोदन्वत् प्रदेशे शुचिमणि विलसत्सैकते मौक्तिकानां
मालाक्लप्तासनस्थः स्फटिकमणि निभैर्मौक्तिकैर्मण्डिताङ्गः ।
शुभ्रैरभ्रैरुपरि विरचितैर्मुक्ति पीयूष वर्षैः
आनन्दी नः पुनीयादरि नलिन गदा शङ्खपाणिर्मुकुन्दः ॥

kṣīrodanvat pradeśe śucimaṇi vilasatsaikate mauktikānāṃ
mālāklraptāsanasthaḥ sphaṭikamaṇi nibhair mauktikair maṇḍitāṅgaḥ ।
śubhrairabhrair upari viracitair mukti pīyūṣa varṣaiḥ
ānandī naḥ punīyādari nalina gadā śaṅkhapāṇir mukundaḥ ॥

May Mukunda, with the discus, mace, conch and lotus in His hands purify us — Mukunda seated on a seat decorated with garlands and pearls, in the region of the milky ocean with the sand shining by the light from pure gems; who is adorned by pearls which are transparent like crystals; who is enjoying ecstatic bliss on account of the pure white clouds overhead showering down a torrent of ambrosia.

भूः पादौ यस्य नाभिर्वियदसुरनिलश् चन्द्र सूर्योच नेत्रे
कर्णावाशार्शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः ।
अन्तस्थं यस्य विश्वं सुरनर खग गो भोगि गन्धर्व दैत्यैः
चित्रं रं रं यते तं त्रिभुवन वपुषं विष्णुं ईशं नमामि ॥

bhūḥ pādau yasya nābhir viyadasur anilaś candra sūryoca netre
karṇāvāśār śiro dyaur mukham api dahano yasya vāsteyamabdhiḥ ।
antasthaṃ yasya viśvaṃ suranara khaga go bhogi gandharva daityaiḥ
citraṃ raṁ raṁ yate taṃ tribhuvana vapuṣaṃ viṣṇum īśaṃ namāmi ॥

I bow to lord Vishnu who contains the three worlds within His body. The earth is His feet, the sky His navel. Wind His breath, the sun and the moon are His eyes, The directions are His ears, and space is His head. Fire His face and the ocean His abdomen. In Him is the entire universe situated, with the diverse kinds of gods, humans, birds, animals, serpents, Gandharvas and demi-gods — all sporting in a charming way.

[oṃ namo bhagavate vāsudevāya]

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्-ध्यानगम्यं वन्दे विष्णुं भव-भय-हरं सर्व-लोकैकनाथम् ॥

śāntākāraṃ bhujagaśayanaṃ padmanābhaṃ sureśaṃ
viśvādhāraṃ gaganasadṛśaṃ meghavarṇaṃ śubhāṅgam ।
lakṣmīkāntaṃ kamalanayanaṃ yogibhir-dhyānagamyaṃ
vande viṣṇuṃ bhava-bhaya-haraṃ sarva-lokaikanātham ॥

I offer my obeisance to Vishnu, who is the embodiment of peace, resting upon the serpent of Tine (Anantasesha). From His navel sprouts the lotus of cosmic manifestation. He is the Lord of the celestial beings. His form is the universe. He is like the sky and of the colour of clouds, auspicious of limbs. He is the Lord of the Goddess of Prosperity, His eyes are like lotuses, and He is realized by yogis through deep meditation. He is the remover of the fear of rebirth, He is the one Lord of the entire Universe.

मेघश्यामं पीतकौशेयवासं श्रीवत्साङ्कं कौस्तुभोद् भासिताङ्गम्
पुण्योपेतं पुण्डरीकायताक्षं विष्णुं वन्दे सर्व-लोकैक नाथम् ॥

meghaśyāmaṃ pītakauśeyavāsaṃ śrīvatsāṅkaṃ kaustubhod bhāsitāṅgam
puṇyopetaṃ puṇḍarīkāyatākṣaṃ viṣṇuṃ vande sarva-lokaika nātham ॥

I prostrate to Vishnu, the one Lord of the Universe, blue as the clouds clothed in yellow silk. His chest is marked by the Srivatsa emblem. His body is resplendant with the gem known as kaustubha. He is surrounded by holy sages, and His eyes are as beautiful as lotuses.

सशङ्ख-चक्रं सकिरीट-कुण्डलं सपीत-वस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षस्र्थल कौस्तुभ-श्रियं नमामि विष्णुं शिरसा चतुर्भुजम् ॥
saśaṅkha-cakraṃ sakirīṭa-kuṇḍalaṃ sapīta-vastraṃ sarasīruhekṣaṇam ।
sahāravakṣarsthala kaustubha-śriyaṃ namāmi viṣṇuṃ śirasā caturbhujam ॥

I bow with my head to the ground before Vishnu, the four-armed Lord holding the conch and discus, adorned with a crown and earrings, clad in yellow silk, with eyes like lotuses, whose chest is adorned with necklaces and the kaustubha gem.

Kṛṣṇa dhyānam

छायायां पारिजातस्य हेम-सिंहासनोपरि । आसीनम् अम्बुदश्यामम् आयताक्षम् अलङ्कृतम् ॥
चन्द्रानमं चतुर्बाहुं श्रीवत्साङ्कित वक्षसम् । रुक्मिणी सत्यभामाभ्यां सहितं कृष्णम् आश्रये ॥
chāyāyāṃ pārijātasya hema-siṃhāsanopari ।
āsīnam ambudaśyāmam āyatākṣam alaṅkṛtam ॥
candrānamaṃ caturbāhuṃ śrīvatsāṅkita vakṣasam ।
rukmiṇī satyabhāmābhyāṃ sahitaṃ kṛṣṇam āśraye ॥

Upon a golden throne under the shade of the heavenly Parijata tree, is seated the adorned cloud-hued one, with wide eyes and a moon like countenance, four-armed, with the mark of Srivatsa upon his chest, I take refuge in Krishna, along with Rukmini and Satyabhama.

कस्तूरि तिलकं ललाट पटले वक्षस्थले कौस्तुभम् ।
नासाग्रे नव मौक्तिकं करतले वेणुं करे कण्कणम् ।
सर्वाङ्गे हरिचन्दनं सुललितं कण्टे च मुक्तावलइम् ।
गोपास्त्री परिवेष्ठितो विजय ते गोपाल-चूडामणि ॥
kastūri tilakaṁ lalāṭa paṭale vakṣasthale kaustubham ।
nāsāgre nava mauktikaṁ karatale veṇuṁ kare kaṇkaṇam ।
sarvāṅge haricandanaṁ sulalitaṁ kaṇṭe ca muktāvalim ।
gopāstrī pariveṣṭhito vijaya te gopāla-cūḍāmaṇi ॥

A musk-rose tilaka is on his forehead, and a Kaustubha is placed on his chest. He wears a new pearls on the tip of his nose, holds a flute on his palms and a bracelet on his wrist. His whole body is smeared with sandalwood paste and he wears a pearl necklace. Victory to you O cowherd boy, surrounded by milk-maids.

Raṅga nātha

आर्तापाश्रयम् अर्थि-कल्पकं असह्यागस्क रक्ष्मातलम् । सद्यस्संश्रित कामधेनुम् अभियत् सर्वस्वमस्मद् धनम् ।
ārtāpāśrayam arthi-kalpakaṁ asahyāgaska rakṣmātalam
sadyas saṁśrita kāmadhenum abhiyat sarvasvam asmad dhanam ।
The shelter of the afflicted, the refuge for the unbearable, the protective base for those who immediately take refuge the lord who is the wish-fufilling cow.
श्री रङ्गेश रमाश्रयं कमलाच क्षुर्महि जीवितम् । श्री रङ्गेश सुखा करोतु सुचिरं दास्यं च धत्तां मयि ।
śrī raṅgeśa ramāśrayaṁ kamalāca kṣurmahi jīvitam ।
śrī raṅgeśa sukhā karotu suciraṁ dāsyaṁ ca dhattāṁ mayi ।
Śrī Rangeśa, the shelter of the goddess of fortune, is the life of the lotus flower.
May Lord Śrī Rāṅgeśa make me happy and allow me your service for a long time.
चैत्रे रेवति सञ्जातं सौम्य जामातरं प्रभुम् । वन्दे वात्सल्य निलयं कल्याण-गुण सागरम् ।
caitre revati sañjātaṁ saumya jāmātaraṁ prabhum ।
vande vātsalya nilayaṁ kalyāṇa-guṇa sāgaram ।
O gentle one, who was born in the month of Chaitra and Revati nakshatra.

I worship the abode of affection, the ocean of auspicious qualities.

लक्ष्मी कल्पलतोत्तुस् तन्यास्तभक चञ्चल । श्री रङ्ग-राज भृङ्गो मे रमतां मनसं भजे ॥
lakṣmī kalpa latottus tanyāstabhaka cañcala ।
śrī raṅga-rāja bhṛṅgo me ramatāṁ manasaṁ bhaje ॥
Lakshmi, the creeper of the imagination, rose up and moved about.
O Śrī Rāṅga-rāja, the bee, I worship You, whose mind is pleased with me.

śrī raṅga-nāyakī tāyār dhyānam

चतुर्भुजां महालक्ष्मीं द्विनेत्रं चार् कुण्डलाम् । श्वेत माल्यां बरधरां हारकेयूर भूषिताम् ।
caturbhujāṁ mahālakṣmīṁ dvinetraṁ cār kuṇḍalām ।
śveta mālyāṁ baradharāṁ hārakeyūra bhūṣitām ।
She has four arms, great opulence, two eyes and four earrings.
She wears a white garland and a necklace and bracelet.

सर्व लक्षण संपन्नां पीनोन्नत पयोधराम् । प्रफुल्लोत्पल विस्तीर्ण लोचनां सुस्मिताननाम् ।
sarva lakṣaṇa saṁpannāṁ pīnonnata payodharām ।
praphullotpala vistīrṇa locanāṁ susmitānanām ।
She has all the characteristics of a woman with larged, raised breasts.
Her eyes are wide like blossoming lotuses and her face is smiling.

लसल्-ललाट तिलकां विदृउमाधर पल्लवां । कृष्ण कुञ्चित केशान्तां वंश मुक्ताफल द्विषाम् ।
पद्म गर्भोद् भवम् आकारां सुमुखीं भावयेत् सदा ॥
lasal-lalāṭa tilakāṁ vidṛumādhara pallavāṁ ।
kṛṣṇa kuñcita keśāntāṁ vaṁśa muktāphala dviṣām ।
padma garbhod bhavam ākārāṁ sumukhīṁ bhāvayet sadā ॥
A musk tilaka on her -forehead and her hair is decorated with flowers. The dark curly hair ends of the lineage of the enemies of the pearl fruit. One should always meditate on the one born from the lotus flower, with a radiant smiling face. .

Śrī-devī dhyānam

या सा पद्मासनस्था विपुल कटि तटी पद्म पत्रायताक्षी ।
गम्भीरा वर्तनाभिर् स्तन-भर नमिता शुभ्र वस्त्रोत्तरीय ॥
लक्ष्मीर्-दिव्यैर्-गजेन्द्रैर्-मणि-गण खचितैस्-स्नापिता हेम-कुम्भैः ।
नित्यं सा पद्म-हस्ता मम वसतु गृहे सर्व माङ्गल्य युक्ता ॥
yā sā padmāsanasthā vipula kaṭi taṭī padma patrāyatākṣī ।
gambhīrā vartanābhir stana-bhara namitā śubhra vastrottarīya ॥
lakṣmīr-divyair-gajendrair-maṇi-gaṇa khacitais-snāpitā hema-kumbhaiḥ ।
nityaṃ sā padma-hastā mama vasatu gṛhe sarva māṅgalya yuktā ॥
May Lakshmi who is seated upon the lotus, with broad hips and lotus leaf like eyes, with a deep and twisting navel and pendulous breasts, garbed in white raiment, bathed by divine elephants holding gem studded golden pots, may she who is the holder of the lotus always reside in my house together with all auspiciousness.

Bhū-devī dhyānam

#1.

नील षट्पद पुञ्जाभ कुटिलालक कोमले । कल्हार दक्षिण-करे भोग-शक्ति स्वरूपिणी ।
समस्त चिद्-अचिद् भेद मन्त्र यन्त्र विधायिनी । भूदेवी त्वां प्रार्थयामि सन्निध्यं कर्तुमर्हसि ॥
nīla ṣaṭpada puñjābha kuṭilālaka komale ।
kalhāra dakṣiṇa-kare bhoga-śakti svarūpiṇī ।
samasta cid-acid bheda mantra yantra vidhāyinī ।
bhūdevī tvāṁ prārthayāmi sannidhyaṁ kartum arhasi ॥

I pray to you, Bhudevi (Earth Goddess): With curly locks dark as a swarm of blue bees, holding a water lily in your right hand, embodiment of enjoyment and power. Creator of all mantras and yantras that distinguish the conscious and unconscious, please grace us with your divine presence.

#2.

वाम-पार्श्व महीं देवीं द्वि-हस्तां श्यामल प्रभां । स्तन बन्ध विहीनाङ्गीं सर्वाभरण भूषिताम् ।
vāma-pārśva mahīṁ devīṁ dvi-hastāṁ śyāmala prabhāṁ ।
stana bandha vihīnāṅgīṁ sarvābharaṇa bhūṣitām ।

On the left side is the Earth Goddess, two-armed with a dark radiance,
Her body unbound at the chest, adorned with all ornaments.

त्रि-भङ्गीं कोमलां कान्तां लक्ष्मीवन् मकुटोज्ज्वलाम् वहन्तीं दक्षिणे हस्ते लसत् कल्हार कुण्डलां ।
tri-bhaṅgīṁ komalāṁ kāntāṁ lakṣmīvan makuṭojjvalām
vahantīṁ dakṣiṇe haste lasat kalhāra kuṇḍalāṁ ।

Gracefully bent in three places, soft and lovely, with a crown brilliant like Lakshmi's,
Holding a gleaming water lily in her right hand.

प्रसारिते तर करां प्रसन्नेन्दु निभाननाम् ।भक्ताभिष्ट-प्रदां देवीं सुमुखीं भावयेत् सदा ॥
prasāritetara karāṁ prasannendu nibhānanām ।
bhaktābhiṣṭa-pradāṁ devīṁ sumukhīṁ bhāvayet sadā ॥

Her other hand extended, face beaming like the pleasant moon,
Always meditate on the Goddess who grants devotees' wishes, with a beautiful countenance.

Nīlā devī

श्रीमत् तुलसी-रूपां विष्णु-पत्नीं हरि-प्रियां । सर्वाभरण संयुक्तां नीलादेवीमहं भजे ॥
śrīmat tuḷasī-rūpāṁ viṣṇu-patnīṁ hari-priyāṁ ।
sarvābharaṇa saṁyuktāṁ nīḷādevīm ahaṁ bhaje ॥

I worship Niladevi (Blue Goddess), in the form of the sacred Tulasi plant,
Beloved consort of Vishnu, adorned with all ornaments.

GĀYATRĪ MANTRAS

Gaṇeśa

ॐ एकदन्ताय विद्महे । वक्रतुण्डाय धीमहि । तन्नो दन्ति प्रचोदयात् ॥
oṁ ekadantāya vidmahe | vakratuṇḍāya dhīmahi | tanno danti pracodayāt ||

Brahma Gāyatri

ॐ वेदात्मनाय विद्महे । हिरण्य-गर्भाय धीमहि । तन्नो ब्रह्म प्रचोदयात् ॥
oṁ vedātmanāya vidmahe | hiraṇya-garbhāya dhīmahi | tanno brahma prac ||

Viṣṇu Gāyatri

ॐ नारायणाय विद्महे । वासुदेवाय धीमहि । तन्नो विष्णु प्रचोदयात् ॥
oṁ nārāyaṇāya vidmahe | vāsudevāya dhīmahi | tanno viṣṇu pracodayāt ||

Śiva

ॐ तत् पुरुषाय विद्महे । महा-देवाय धीमहि । तन्नो रुद्र प्रचोदयात् ।
oṁ tat puruṣāya vidmahe | mahā-devāya dhīmahi | tanno rudra pracodayāt |

Lakṣmī

ॐ महादेव्यै च विद्महे । विष्णु पत्न्यै च धीमहि । तन्नो लक्ष्मी प्रचोदयात् ॥
oṁ mahādevyai ca vidmahe | viṣṇu patnyai ca dhīmahi | tanno lakṣmī prac. ||

Bhū Devī

ॐ धनुर्-धराय विद्महे । सर्व सिद्ध्यै च धीमहि । तन्नो धरा प्रचोदयात् ॥
oṁ dhanur-dharāya vidmahe | sarva siddhyai ca dhīmahi | tanno dharā pra ||

Sarasvati

ॐ वाग्देव्यै च विद्महे । ब्रह्म-पत्न्यै च धीमहि । तन्नो वाणी प्रचोदयात् ॥
oṁ vāgdevyai ca vidmahe | brahma-patnyai ca dhīmahi | tanno vāṇī pracodayāt

Krṣṇa

ॐ गोविन्दाय विद्महे । वासुदेवाय धीमहि । तन्नः कृष्णः प्रचोदयात् ॥
oṁ govindāya vidmahe | vāsudevāya dhīmahi | tannaḥ kṛṣṇaḥ pracodayāt ||

Hayagrīva

ॐ वागीश्वराय विद्महे । हयग्रीवाय धीमहि । तन्नो हंसः प्रचोदयात् ॥
oṁ vāgīśvarāya vidmahe | hayagrīvāya dhīmahi | tanno haṁsaḥ pracodayāt |

Paraśurāma

ॐ जमदग्न्याय विद्महे । महावीराय धीमहि । तन्नः परशुरामः प्रचोदयात् ॥
oṁ jamadagnyāya vidmahe | mahāvīrāya dhīmahi | tannaḥ paraśurāmaḥ pra ||

Rāma

ॐ दाशरथये विद्महे । सीत-वल्लभाय धीमहि । तन्नो रामः प्रचोदयात् ॥
oṁ dāśarathaye vidmahe | sīta-vallabhāya dhīmahi | tanno rāmaḥ pracodayāt ||

Lakṣmaṇa

ॐ दाशरथये विद्महे । अलबेलाय धीमहि । तन्नो लक्ष्मणः प्रचोदयात् ॥
oṁ dāśarathaye vidmahe | alabelāya dhīmahi | tanno lakṣmaṇaḥ pracodayāt ||

Sītā

ॐ जनकात्मजायै विद्महे । राम-प्रियायै धीमहि । तन्नः सीता प्रचोदयात् ॥
oṁ janakātmajāyai vidmahe | rāma-priyāyai dhīmahi | tannaḥ sītā pracod ||

Hanumān

ॐ आञ्जनेयाय विद्महे । वायु-पुत्राय धीमहि । तन्नो हनुमान् प्रचोदयात् ॥
oṁ āñjaneyāya vidmahe | vāyu-putrāya dhīmahi | tanno hanumān pracod ||

Vāstu

ॐ वास्तु पुरुषाय विद्महे । भूमी-पुत्राय धीमहि । तन्नो वास्तु प्रचोदयात् ॥
oṁ vāstu puruṣāya vidmahe | bhūmī-putrāya dhīmahi | tanno vāstu pracodayāt ||

Avatāra Gāyatrīs

1. Matsya avatāra

ॐ तीक्ष्न-दंष्ट्राय विद्महे । ज्वाल-चक्राय धीमहि । तन्नो मत्स्य चोदयात् ॥
oṁ tīkṣna-daṃṣṭrāya vidmahe | jvāla-cakrāya dhīmahi | tanno matsya prac. ||

2. Kūrma

ॐ दीर्घ-कण्ठाय विद्महे । मही-धराय धीमहि । तन्नः कूर्म चोदयात् ॥
oṁ dīrgha-kaṇṭhāya vidmahe | mahī-dharāya dhīmahi | tannaḥ kūrma prac. ||

ॐ कच्छपेशाय विद्महे । महाबलाय धीमहि । तन्नः कूर्मः प्रचोदयात् ॥
oṁ kacchapeśāya vidmahe | mahābalāya dhīmahi | tannaḥ kūrmaḥ pracodayāt ||

ॐ लोकाध्यक्षाय विद्महे । धाराध्यक्षाय धीमहि । तन्न कूर्मः प्रचोदयात् ॥
oṁ lokādhyakṣāya vidmahe | dhārādhyakṣāya dhīmahi | tanna kūrmaḥ prac.||

3. Varāha

ॐ भूवराहाय विद्महे । क्रोढ रूपाय धीमहि । तन्नः श्रीशः प्रचोदयात् ॥
oṁ bhūvarāhāya vidmahe | kroḍha rūpāya dhīmahi | tannaḥ śrīśaḥ pracodayāt ||

ॐ भूवराहाय विद्महे । हिरण्य गर्भाय धीमहि । तन्नो क्रोषः प्रचोदयात् ॥
oṁ bhūvarāhāya vidmahe | hiraṇya garbhāya dhīmahi | tanno kroṣaḥ pracodayāt

4. Narasiṃha

ॐ नारसिंहाय विद्महे । वज्र-नखाय धीमहि । तन्नस् सिंह प्रचोदयात् ॥
oṁ nārasiṁhāya vidmahe | vajra-nakhāya dhīmahi | tannas siṁha pracod ||

ॐ वज्र-नखाय विद्महे । तीक्ष्न-दंष्ट्राय धीमहि । तन्नो त्रिसंह प्रचोदयात् ॥
oṁ vajra-nakhāya vidmahe | tīkṣna-daṃṣṭrāya dhīmahi | tanno nrsiṃha pr ||

ॐ उग्र-सिंहाय विद्महे । वज्र-नखाय धीमहि । तन्नो नरसिंह प्रचोदयात् ॥
oṁ ugra-siṃhāya vidmahe | vajra-nakhāya dhīmahi | tanno narasiṃha prac. ||

ॐ नरसिंहाय विद्महे । वज्र-नखाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥
oṁ narasiṃhāya vidmahe | vajra-nakhāya dhīmahi | tanno viṣṇuḥ pracod ||

5. Vāmana

ॐ पर-ब्रह्मणे विद्महे । वामनाय धीमहि । तन्नः ब्रह्मन् प्रचोदयात् ॥
oṁ para-brahmaṇe vidmahe | vāmanāya dhīmahi | tannaḥ brahman pracodayāt ||

ॐ त्रैविक्रमाय विद्महे । विश्व-रूपाय धीमहि । तन्नः विश्वं प्रचोदयात् ॥
oṁ traivikramāya vidmahe | viśva-rūpāya dhīmahi | tannaḥ viśvaṁ pracodayāt ||

6. paraśurāma

ॐ जमदग्न्याय विद्महे । महावीराय धीमहि । तन्नः परशुरामः प्रचोदयात् ॥
oṁ jamadagnyāya vidmahe | mahāvīrāya dhīmahi | tannaḥ paraśurāmaḥ prac. ||

7. Rāma

ॐ दाशरथाय विद्महे । रामचन्द्राय धीमहि । तन्नो राम प्रचोदयात् ॥
oṁ dāśarathāya vidmahe | rāmacandrāya dhīmahi | tanno rāma pracodayāt ||

8. kṛṣṇa

ॐ गोपीजनाय विद्महे । जगन्-मोहनाय धीमहि । तन्नः कृष्न प्रचोदयात् ॥
oṁ gopījanāya vidmahe | jagan-mohanāya dhīmahi | tannaḥ kṛṣna pracodayāt ||

9. bala-rāma

ॐ श्वेत-वर्णाय विद्महे । बल-रामाय धीमहि । तन्नस् शेषं प्रचोदयात् ॥
oṁ śveta-varṇāya vidmahe | bala-rāmāya dhīmahi | tannas śeṣaṁ pracodayāt ||

Navagraha Gāyatrīs

१. ॐ भास्कराय विद्महे । महा-द्युति-कराय धीमहि । तन्नो आदित्य प्रचोदयात् ॥
oṁ bhāskarāya vidmahe | mahā-dyuti-karāya dhīmahi | tanno āditya pracodayāt
२. ॐ निशा-कराय विद्महे । कला-नाथाय धीमहि । तन्नश्-चन्द्र प्रचोदयात् ॥
oṁ niśā-karāya vidmahe | kalā-nāthāya dhīmahi | tannaś-candra pracodayāt ॥
३. ॐ अङ्गारकाय विद्महे । भूमि-पुत्राय धीमहि । तन्न कुज प्रचोदयात् ॥
oṁ aṅgārakāya vidmahe | bhūmi-putrāya dhīmahi | tanna kuja pracodayāt ॥
४. ॐ सौम्य-कराय विद्महे । सोम-सुताय धीमहि । तन्नो बुध प्रचोदयात् ॥
oṁ saumya-karāya vidmahe | soma-sutāya dhīmahi | tanno budha pracodayāt ॥
५. ॐ सुराचार्याय विद्महे । सुर-श्रेष्ठाय धीमहि । तन्नो गुरु प्रचोदयात् ॥
oṁ surācāryāya vidmahe | sura-śreṣṭhāya dhīmahi | tanno guru pracodayāt ॥
६. ॐ भार्गवाय विद्महे । भृगु-सुताय धीमहि । तन्नश्-शुक्र प्रचोदयात् ॥
oṁ bhārgavāya vidmahe | bhṛgu-sutāya dhīmahi | tannaś-śukra pracodayāt ॥
७. ॐ पङ्गु-पादाय विद्महे । काक-ध्वजाय धीमहि । तन्नश्-शनैश्चर प्रचोदयात् ॥
oṁ paṅgu-pādāya vidmahe | kāka-dhvajāya dhīmahi | tannaś-śanaiścara pra. ॥
८. ॐ नाग-रूपाय विद्महे । सिंहि-पुत्राय धीमहि । तन्नो राहु प्रचोदयात् ॥
oṁ nāga-rūpāya vidmahe | siṁhi-putrāya dhīmahi | tanno rāhu pracodayāt ॥
९. ॐ चित्र-वर्णाय विद्महे । चित्र-गुप्ताय धीमहि । तन्नो केतु प्रचोदयात् ॥
oṁ citra-varṇāya vidmahe | citra-guptāya dhīmahi | tanno ketu pracodayāt ॥

Aṣṭa-dikpālaka Gāyatrīs

१. ॐ तत् पुरुषाय विद्महे । सहस्राक्षाय धीमहि । तन्न इन्द्रः प्रचोदयात् ॥
oṁ tat puruṣāya vidmahe | sahasrākṣāya dhīmahi | tanna indraḥ pracodayāt ॥
२. ॐ महा ज्वालाय विद्महे । अग्निम्-अघ्न्याय धीमहि । तन्नोग्निः प्रचोदयात् ॥
oṁ mahā jvālāya vidmahe | agnim-aghnyāya dhīmahi | tannogniḥ prac. ॥
३. ॐ तत्-पुरुषाय विद्महे । धर्म-राजाय धीमहि । तन्नो यमः प्रचोदयात् ॥
oṁ tat-puruṣāya vidmahe | dharma-rājāya dhīmahi | tanno yamaḥ prac. ॥
४.। ॐ तत्-पुरुषाय विद्महे । प्रेत-राजाय धीमहि । तन्नः निॠऋति प्रचोदयात् ॥
oṁ tat-puruṣāya vidmahe | preta-rājāya dhīmahi | tannaḥ niṛṛti pracodayāt ॥
५. ॐ जल-बिम्बाय विद्महे । नील-पुरुषाय धीमहि । तन्नो वरुण प्रचोदयात् ॥
oṁ jala-bimbāya vidmahe | nīla-puruṣāya dhīmahi | tanno varuṇa prac. ॥
६. ॐ पवन पुरुषाय विद्महे । सहस्र मूर्तये च धीमहि । तन्नो वायुः प्रचोदयात् ॥
oṁ pavana puruṣāya vidmahe | sahasra mūrtaye ca dhīmahi | tanno vāyuḥ pra.
७. ॐ तत्-पुरुषाय विद्महे । धन-राजाय धीमहि । तन्नो कुबेर प्रचोदयात् ॥
oṁ tat-puruṣāya vidmahe | dhana-rājāya dhīmahi | tanno kubera pracodayāt ॥
८. ॐ तत्-पुरुषाय विद्महे । महादेवाय धीमहि । तन्नो ईशानः प्रचोदयात् ॥
oṁ tat-puruṣāya vidmahe | mahādevāya dhīmahi | tanno īśānaḥ pracodayāt ॥

THE FINAL SACRAMENT FOR A ŚRĪVAIṢṆAVA

(From Pañcarātra Āgama)

Preparation of the corpse

- *Devotees should attend to the preparation as far as possible.*
- *The body is either bathed with jugs of water or at least given a sponge bath.*
- *Sprinkle with a mixture of cow-dung, water and earth while reciting the Astra mantra.*

ॐ फट् oṁ phaṭ

- *Anoint the corpse with rose water or perfume.*
- *Apply sandal-wood paste to the whole body and tilak to the forehead.*
- *Dress with yellow robes if a brahmacari or white clothes if a gṛhasta*
- *Put on a new sacred thread and uttariya.*
- *Place a pavitri on each hand, and a garland of flowers around the neck.*
- *In the right hand place the japa-mālā.*
- *At home the coffin is placed with the head to the south.*
- *Place all the articles for use in the Isana Kona.*

PURIFICATION OF CORPSE

- *Establish clay pot on a bed of rice and invoke Sudarśana.*

Mūla Mantra Nyāsa

अस्य श्री सुदर्शन महा-मन्त्रस्य अहिर्बुध्न्यो भगवान् ऋषिः ।
asya śrī sudarśana mahā-mantrasya ahirbudhnyo bhagavān ṛṣiḥ [head] ।
अनुष्टुप् छन्दः। anuṣṭup chandaḥ [mouth]।
श्री सुदर्शन चक्र-राजो भगवान् देवता ।
śrī sudarśana cakra-rājo bhagavān devatā [heart]।
क्षौं महा-ज्वालाय बीजं। kṣauṃ mahā-jvālāya bījaṃ [navel]।
क्लीं शत्रु-मर्दनाय शक्तिः । klīṃ śatru-mardanāya śaktiḥ [genital region] ।
क्लीं सर्व भव निवारणाय कीलकं । klīṃ sarva bhava nivāraṇāya kīlakaṃ [feet]।
श्री भगवत् कैङ्कर्ये बाधा निवृत्ति पूर्वकं अविच्छिन्न शाश्वत कैङ्कर्य प्राप्त्यर्थं शट्-कोन मध्यस्थित विष्णु चक्र अन्त्येष्टि संस्कारे आवाहने विनियोगः ॥
śrī bhagavat kaiṅkarye bādhā nivṛtti pūrvakaṃ avicchinna śāśvata kaiṅkarya prāptyarthaṁ śaṭ-kona madhyasthita viṣṇu cakra antyeṣṭi saṃskāre āvāhane viniyogaḥ ॥

- *Take the uddhariṇi fill with water, add akṣata and a flower, hold it in the left hand and cover it with the right hand.*
- *Raise it to the forehead and recite the dhyāna śloka and visualize sudarśana in the ajña cakra.*

शङ्खं चक्रं च चापं परशुं असिमिशुं शूल पाशां कुशांश्च ।
बिभ्रानं वज्र केटं हल मुसुल गदा कुण्टं अत्युग्र दंष्ट्रं ॥
ज्वाला केशं त्रिनेत्रं ज्वलदानल निभं हार केयूर भूषम् ।
ध्यायेत् शट्कोन संस्थं सकल रिपु-कुल प्राण संहार चक्रम् ॥

śankhaṃ cakraṃ ca cāpaṃ paraśuṃ asimiśuṃ śūla pāśāṃ kuśāṃśca ।
bibhrānaṁ vajra keṭaṃ hala musula gadā kuṇṭaṃ atyugraṁ daṃṣṭraṃ ॥
jvālā keśaṃ trinetraṃ jvaladānala nibhaṃ hāra keyūra bhūṣam ।
dhyāyet śaṭkona saṃsthaṃ sakala ripu-kula prāṇa saṃhāra cakram ॥

I visualize Sudarshana the eliminator of all hostile forces, located within the six-cornered star, bearing the conch, discus, bow, axe, sword, trident, noose, goad, the diamond-shield, plough, cudgel, mace, spear, with aweful sharp fangs, with blazing halo, three eyes, the intensity of a raging inferno, adorned with garlands and anklets.

ॐ सहस्रार हुं फट् oṁ sahasrāra huṁ phaṭ

❖ *Pour the water and flower into the right hand and place it on top of the kalaśa.*

ॐ नमः सुदर्शनाय आगच्छ आगच्छ [x ३]
oṁ namaḥ sudarśanāya āgaccha āgaccha [3 times]

अर्घ्यं । पाद्यं । आचमनियं । स्नानं । वस्त्रं । उपवीतं । आभरणं । गन्धं । पुष्प-मालिकां । पुष्पैः पूजयामि — ॐ श्री सुदर्शनाय नमः । चक्र-राजाय । तेजो-व्युहाय । महा-द्युताय । सहस्र-बाहवे । दीप्ताङ्गाय । अरुणाक्षाय । प्रतापवते । अनेकादित्य-सङ्काशाय । प्रोर्ध्व-ज्वल भिरञ्जिताय । सौदामणि-सहस्राभाय । मणि-कुण्डल-शोभिताय । पञ्च-भूत-मनो-रूपाय । षट्-कोणान्तर-संस्थिताय । हरान्त-कारणोद्भुत-रोष-भीषन-विग्रहाय । हरि-पाणि-लसत्-पद्म-विहार-मनोहराय ॥

arghyaṁ | pādyaṁ | ācamaniyaṁ | snānaṁ | vastraṁ | upavītaṁ | ābharaṇaṁ | gandhaṁ | puṣpa-mālikāṁ | puṣpaiḥ pūjayāmi — oṁ śrī sudarśanāya namaḥ | cakra-rājāya | tejo-vyuhāya | mahā-dyutāya | sahasra-bāhave | dīptāṅgāya | aruṇākṣāya | pratāpavate | anekāditya-saṅkāśāya | prordhva-jvala-bhirañjitāya | saudāmaṇi-sahasrābhāya | maṇi-kuṇḍala-śobhitāya | pañca-bhūta-mano-rūpāya | ṣaṭ-koṇāntara-saṁsthitāya | harānta-kāraṇodbhuta-roṣa-bhīṣana-vigrahāya | hari-pāṇi-lasat-padma-vihāra-manoharāya ||

धूपं । दीपं । नैवेद्यं । ताम्बूलं । फलं । कर्पूर निराजनं ।
dhūpaṁ | dīpaṁ | naivedyaṁ | tāmbūlaṁ | phalaṁ | karpūra nirājanaṁ |
ॐ सुदर्शनाय विद्महे । हेति-राजाय धीमहि । तन्नस् चक्र प्रचोदयात् ॥
oṁ sudarśanāya vidmahe | heti-rājāya dhīmahi | tannas cakra pracodayāt ||

❖ *recite viṣṇu gāyatrī*

पवित्रं भगवानस्तु वासुदेवः परो गुरुः । अस्तु सङ्कर्षणो देवः पवित्रं परमो विभुः ॥ १ ॥
pavitraṃ bhagavān astu vāsudevaḥ paro guruḥ |
astu saṅkarṣaṇo devaḥ pavitraṃ paramo vibhuḥ || 1 ||

प्रद्युम्नोऽस्तु पवित्रं वै साक्षी विश्वस्य साम्प्रतम् ।पवित्रं अनिरुद्धोऽस्तु विश्वत्रात जगत्पतिः ॥ २
pradyumno'stu pavitraṃ vai sākṣī viśvasya sāmpratam |
pavitraṃ aniruddho 'stu viśvatrāta jagat-patiḥ || 2 ||

शुद्धयेऽस्तु परो देवो वासुदेवोऽस्तु शुद्धये । सदा सङ्कर्षणो देवः शुद्धये ऽस्तु सदा मलः ॥ ३ ॥
śuddhaye 'stu paro devo vāsudevo'stu śuddhaye |
sadā saṅkarṣaṇo devaḥ śuddhaye 'stu sadā malaḥ || 3 ||

शुद्धये विष्णुस्त्वाद्य शुद्धये मधुसूदनः । सर्व लोक हितो देवः शुद्धये ऽस्तु त्रिविक्रमः ॥ ५ ॥
śuddhaye viṣṇur astvādya śuddhaye madhusūdanaḥ |
sarva loka hito devaḥ śuddhaye 'stu trivikramaḥ || 4 ||

वामनस्शुद्धये अस्त्वाद्यः श्रीधरोऽस्त्वाद्य शुद्धये । शुद्धयेऽस्तु हृषीकेशः पद्मनाभोऽस्तु शुद्धये ॥ ६
vāmanas śuddhaye astvādyaḥ śrīdharo 'stvādya śuddhaye |
śuddhaye 'stu hṛṣīkeśaḥ padmanābho 'stu śuddhaye || 5 ||

सदा दामोदरो देवः शुद्धयेऽस्तु जगत्-पतिः । शुद्धयेऽस्तु सदा देवः केशवः केशि-सूदनः ॥ ७ ॥

sadā dāmodaro devaś śuddhaye'stu jagat-patiḥ ।
śuddhaye'stu sadā devaḥ keśavaḥ keśi-sūdanaḥ ॥ 6 ॥

नारायणोऽस्तु विश्वेशश् शुद्धये सर्व कर्मसु । शुद्धये माधवो ऽस्त्वत्र सर्व लोक-हिते रतः ॥८ ॥
nārāyaṇo 'stu viśveśaś śuddhaye sarva karmasu ।
śuddhaye mādhavo 'stvatra sarva loka-hite rataḥ ॥ 7 ॥

शुद्धयेचाऽस्तु गोविन्दः परमात्म सनातनः । मीनात्मा शुद्धये ऽस्त्वद्य कूर्मात्माद्यास्तु शुद्धये ॥९ ॥
śuddhaye cā'stu govindaḥ paramātma sanātanaḥ ।
mīnātmā śuddhaye 'stvadya kūrmātmādyāstu śuddhaye ॥ 8 ॥

शुद्धयेऽस्तु वराहात्मा नृसिंहात्माऽस्तु शुद्धये । शुद्धये वामनात्माऽस्तु रामात्माद्या ऽस्तु शुद्धये ॥१०
śuddhaye'stu varāhātmā nṛsiṃhātmā'stu śuddhaye ।
śuddhaye vāmanātmā 'stu rāmātmādyā 'stu śuddhaye ॥ 9 ॥

तथा दाशरथी रामः शुद्धयेऽस्तु सदा गुरुः । वासुदेवात्मजो रामः शुद्धये ऽस्तु सदा-मलः ॥११ ॥
tathā dāśarathī rāmaś śuddhaye 'stu sadā guruḥ ।
vāsudevātmajo rāmaś śuddhaye 'stu sadā-malaḥ ॥ 10 ॥

कृष्णोऽस्तु शुद्धये शौरिःबुद्धात्माऽस्तु विशुद्धये । शुद्धयेऽस्तु महा-मायःकल्की विष्णुः सनातनः ॥
kṛṣṇo'stu śuddhaye śauriḥ buddhātmā'stu viśuddhaye ।
śuddhaye'stu mahā-māyaḥ kalkī viṣṇuḥ sanātanaḥ ॥ 11 ॥

❖ *Valedict Sudarśana and then sprinkle the corpse with the water.*

pavitra mantra.

ॐ भगवन् पवित्रं वासुदेव पवित्रं, तत् पादौ पवित्रं, तत् पादोदकं पवित्रं, शत धारं, सहस्र धारं, अपरिमित धारं, अच्छिद्रं अनन्तम् अपरिमित अरिष्ठं, अच्युतन् अक्षयं परमं पवित्रं, भगवन् वासुदेवः पुनातु ॥

oṁ bhagavan pavitraṃ vāsudeva pavitraṃ, tat pādau pavitraṃ, tat pādodakaṃ pavitraṃ, śata dhāraṃ, sahasra dhāraṃ, aparimita dhāraṃ, acchidraṃ ariṣṭhaṃ akṣayaṃ paramaṃ pavitraṃ bhagavan vāsudevaḥ punātu ॥

Aṅga-Nyāsaḥ

Using the mūla mantra — ॐ नमो भगवते नरसिंहाय oṁ namo bhagavate narasimhāya — *perform ṣaḍanga-nyāsa on the śava with a kurca of darbha grass.*

ॐ हृदयाय नमः	oṁ hṛdayāya namaḥ — touch the heart
नमः शिरसे स्वाहा	namaḥ śirase svāhā — touch the head
भगवते शिखायै वषट्	bhagavate śikhāyai vaṣaṭ — touch the crown of the head
नरसिंहाय कवचाय हुं	narasiṃhāya kavacāya huṃ — touch the shoulders
ॐ नेत्र-त्रयाय वौषट्	oṁ netra-trayāya vauṣaṭ — touch the forehead
नमः अस्त्राय फट्	namaḥ astrāya phaṭ — clap the hands
भगवते नरसिंहाय इति दिग् बन्धः	bhagavate narasiṃhāya iti dig bandhaḥ

